संस्कृतविद्यापीठग्रन्थमालायाः चतुरशीतिः पुष्पम्

भारतीयचिन्तने स्याद्वादः

प्रधानसम्पादकः

प्रो. राधावल्लभत्रिपाठी

कुलपतिः

सम्पादकः

प्रो. वीरसागरजैनः

सहसम्पादकौ

डॉ. अनेकान्तकुमारजैनः

डॉ. कुलदीपकुमारः

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्

(मानितविश्वविद्यालयः)

नवदेहली-16

संस्कृतविद्यापीठग्रन्थमालायाः चतुरशीतिः पुष्पम्

भारतीयचिन्तने स्याद्वादः

प्रधानसम्पादकः
प्रो. राधावल्लभत्रिपाठी
कुलपतिः

सम्पादकः
प्रो. वीरसागरजैनः

सहसम्पादकौ
डॉ. अनेकान्तकुमारजैनः
डॉ. कुलदीपकुमारः

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
नवदेहली-16

प्रकाशक:
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानित-विश्वविद्यालय:)
कुतुबसांस्थानिकक्षेत्रम्
नवदेहली-११००१६

आई.एस.बी.एन : 81-87987-58-0

प्रकाशनवर्ष: - 2013

मूल्यम् : ₹ 175/-

मुद्रक:
अमरप्रिंटिंगप्रैस:
देहली-११०००९
दूरभाष: : 9871699565, 8802451208

प्रो. राधावल्लभत्रिपाठी
कुलपतिः (प्रभारी)
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
बी-४, कुतुब-इन्स्टीट्यूशनलएरिया, नवदेहली-110016

Prof. Radhavallabh Tripathi
Vice-Chancellor (I/c)
Shri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeetha
(Deemed University)
B-4, Qutub Institutional Area, New Delhi-110016

पुरोवाक्

स्याद्वाद अथवा अनेकान्त जैनपरम्परा का विश्व को अप्रतिम योगदान है। यह अनेक अत्याधुनिक वैज्ञानिक विचारधाराओं का भी पूर्वाभास प्रस्तुत करता है। अनेकान्त वस्तु के विराट् स्वरूप को जानने का वह तरीका है, जिसमें विवक्षित धर्म को जान कर भी अन्य धर्मो का निषेध नहीं किया जाता। उन्हें मात्र गौण या अविवक्षित कर दिया जाता है और इस प्रकार मुख्य-गौण भाव से सम्पूर्ण वस्तु का ज्ञान और उसका वर्णन हो जाता है। उसका कोई भी अंश कभी छूट नहीं पाता क्यों कि जिस समय जो धर्म विवक्षित रहता है उस समय वह धर्म मुख्य तथा अन्य शेष धर्म गौण रह जाते हैं। इस दृष्टि से जब मनुष्य अनंत धर्मात्मक वस्तु को स्पर्श करने लग जाता है तब वह विचार करता है कि हमें उस शैली में वचन विन्यास करना चाहिए जिसमें इस अनंत धर्मात्मक वस्तु का यथार्थ प्रतिपादन हो सके। उस निर्दोष वचन विन्यास की आवश्यकता ने 'स्याद्वाद' का आविष्कार कर दिया। इसमें लगा 'स्यात्' पद कथञ्चित् के अर्थ में प्रत्येक वाक्य के सापेक्ष होने की सूचना देता है। इस प्रकार अनेकान्त और स्याद्वाद में वाच्य-वाच्य सम्बन्ध है। अनेकान्त की कथन पद्धति का नाम ही स्याद्वाद है। सत्य के प्रतिपादन में स्याद्वाद की शैली हमारे सारे संशय दूर सकती है।

अनेकान्त से निष्पन्न जीवनबोध दूसरों के दृष्टिकोण को समझने की क्षमता का आधान करते हुए जीवन के उदार और व्यापक परिप्रेक्ष्य को प्रस्तुत करता है। यह सहिष्णुता और अहिंसा की जीवनदृष्टि से हमें जोड़ता है। आज के युग में यह दृष्टि कितनी प्रासंगिक है- यह कहने की आवश्यकता नहीं।

आचार्य कुन्दकुन्द, समन्तभद्र, सिद्धसेन, अकलंक, हरिभद्र, विद्यानंद, हेमचंद्र आदि अनेक प्राचीन जैन आचार्यों ने प्राकृत तथा संस्कृत में

अनेक शास्त्रों का प्रणयन करके भगवान महावीर की स्याद्वाद शैली की स्थापना बहुत श्रमपूर्वक की है। प्रायः देखा जाता है कि हम इतर दर्शनों का अभिप्राय अपने ग्रन्थ के पूर्वपक्ष को पढ़कर ही समझते हैं। उस ग्रन्थ को देखने का प्रयास नहीं करते जहाँ उसका वास्तविक प्रतिपादन है। किसी भी दर्शन के मंतव्य को समझने का यह राजमार्ग नहीं है। उपरोक्त आचार्यों के द्वारा प्रणीत ग्रन्थों का अध्ययन यदि कोई मनीषी करेगा तो मुझे विश्वास है कि वह अपना दुराग्रह छोड़ देगा और सत्य के वास्तविक स्वरूप को समझने की सही दृष्टि विकसित करेगा।

मुझे प्रसन्नता है कि विद्यापीठ के जैनदर्शन विभाग के आचार्यों ने **'भारतीय चिंतन में स्याद्वाद'** पर आयोजित एक राष्ट्रीय संगोष्ठी में पठित शोध निबन्धों को अत्यंत श्रम के साथ सम्पादित किया है। मैं आशा करता हूँ कि यह ग्रन्थ दार्शनिक विचारकों तथा अनुसन्धाताओं के लिए महत्वपूर्ण सिद्ध होगा। ग्रन्थ के सुन्दर प्रकाशन के लिए विद्यापीठ का प्रकाशन विभाग भी धन्यवाद का पात्र है।



प्रो. राधावल्लभ त्रिपाठी

सम्पादकीय

दि. 28 मार्च 2011 को विद्यापीठ के श्रद्धेय कुलपति स्व. प्रो. वाचस्पति उपाध्याय जी की पावन प्रेरणा से **'भारतीय चिन्तन में स्याद्वाद'** विषय पर जैनदर्शन विभाग ने एक राष्ट्रिय संगोष्ठी का संयोजन किया।

इसमें देशभर के अनेक विद्वानों ने जैनदर्शन के प्राणभूत सिद्धान्त स्याद्वाद की पूर्व-उत्तर पक्षों सहित गंभीर समीक्षा प्रस्तुत की जो इस सिद्धान्त को भलीभाँति समझने में अत्यन्त सहायक सिद्ध हुई।

प्रस्तुत कृति में उक्त संगोष्ठी में समागत विद्वानों के उन्हीं शोधपत्रों को लगभग ज्यों का त्यों प्रकशित किया जा रहा है और यही इस कृति की मुख्य विशेषता है। ऐसी कृतियाँ अनेक हैं जो स्याद्वाद के समर्थन में ही हैं और ऐसी भी रचनाएँ हैं जो उसके विपक्ष में ही हैं। किन्तु यह कृति दोनों पक्षों को ईमानदारी से रखने का एक लघु प्रयास है।

स्याद्वाद पर आयोजित इस संगोष्ठी की एक विशेषता यह रही कि उसमें चर्चा-परिचर्चाएँ खुलकर हुईं। अन्य दर्शन के विशेषज्ञ विद्वानों ने स्याद्वाद पर अनेक शंकाएँ रखीं तथा उनका समाधान प्राप्त किया। संगोष्ठी में परिचर्चा के माध्यम से प्रत्येक प्रतिभागी ने अपने विचार प्रस्तुत किये।

हम समझते हैं– 'स्याद्वाद' पर यह एक जीवन्त संगोष्ठी रही, जिसमें वहाँ उपस्थित सभी प्रतिभागियों को यह महसूस हुआ कि हमें इस विषय को हल्के में नहीं लेना चाहिए, प्रत्युत इस विषय को जैनाचार्यों के संस्कृत-प्राकृत में लिखे मूलग्रन्थों से समझना चाहिए। ऐसा अक्सर होता है कि हम दर्शनशास्त्र के कई महत्त्वपूर्ण सिद्धान्तों को मात्र उतना ही जानते हैं जितना तथाकथित लोगों के द्वारा अफवाह की तरह फैला दिया जाता है। मूलग्रन्थों के साथ उसकी गहराई में जाने का यत्न ही नहीं करते हैं। फलस्वरूप जीवन भर उस महत्त्वपूर्ण सिद्धान्त के साथ न्याय नहीं कर पाते हैं, खुद भी धोखे में रहते हैं और दूसरों को भी धोखे में रखते हैं।

इस ग्रंथ में हमने प्रयास किया है कि नवोदित प्रतिभाओं को भी अवसर प्राप्त हो। प्रतिभागियों में अनेक युवा शोधछात्र तथा छात्रायें भी थीं। हमने उनमें से कुछ प्रमुख आलेखों को उनके प्रोत्साहनार्थ भी इस ग्रन्थ में स्थान दिया है। हमने देश के सुप्रसिद्ध वरिष्ठ जैन विद्वान् स्व. पं. माणिकचन्द्र कौंदेय के एक अनुपलब्ध महत्त्वपूर्ण लेख को भी इस ग्रंथ के प्रारम्भ में रखकर विषय की गम्भीरता को प्रकट करने का प्रयास किया है। विद्यापीठ के अनेक आचार्यों के शास्त्रीय लेख भी इस ग्रन्थ की शोभा हैं। अनेक लेख आधुनिक सन्दर्भों को लिए हुए हैं, जिन्हें हमने इसलिए रखा है ताकि नये युग की नयी समस्याओं के समाधान के सन्दर्भ में 'स्याद्वाद' से मार्ग प्रशस्त हो सके, शोध-अनुसन्धान की नयी सम्भावनाएँ जन्म ले सकें।

हम कहना चाहते हैं कि यदि हम दुराग्रह से मुक्त नहीं हो सके हैं तो उसका अर्थ है कि हम 'स्याद्वाद' को समझ नहीं सके हैं। 'स्याद्वाद' एक किस्म का सत्याग्रह है जिसे समझने-समझाने का जैन दर्शन विभाग ने इस संगोष्ठी के माध्यम से प्रयास किया है। उसी के फलस्वरूप यह लेखों (विचारों) का गुलदस्ता यहाँ प्रस्तुत है।

प्रस्तुत कृति के प्रकाशन के अवसर पर हम श्रद्धेय कुलपति प्रो. वाचस्पति उपाध्याय को अपनी श्रद्धांजलि अर्पित करते हैं, जिनकी प्रेरणा से यह महत्त्वपूर्ण संगोष्ठी आयोजित हुई तथा सभी प्रतिभागी विद्वानों के प्रति हार्दिक कृतज्ञता ज्ञापित करते हैं जिन्होंने संगोष्ठी को सार्थक बनाया और जिनके लेख प्रस्तुत कृति में प्रकाशित हो रहे हैं।

वर्तमान कुलपति प्रो. राधावल्लभ त्रिपाठी जी ने इस कृति के लिए पुरोवाक् लिखकर महती अनुकम्पा की है, अत: उनके प्रति हार्दिक आभार व्यक्त करते हैं।

विद्यापीठ के शोधप्रकाशनाविभागाध्यक्ष प्रो. रमेश कुमार पाण्डेय और शोध सहायक डॉ. ज्ञानधर पाठक के सहयोग हेतु धन्यवाद ज्ञापित करते हैं। जैनदर्शन विभाग के सभी अध्यापकों एवं छात्र-छात्राओं का भी इस कृति के प्रकाशन में बड़ा सहयोग रहा है, अत: उन सबको धन्यवाद देकर अपनी लेखनी को विराम देते हैं।

–वीरसागर जैन

अनुक्रम

पक्षपातो न मे वीरे न द्वेषः कपिलादिषु।
युक्तिमद्वचनं यस्य तस्य कार्यः परिग्रहः॥

मुझे महावीर जिनेन्द्र से कोई पक्षपात नहीं है और अन्य कपिलादि से कोई द्वेष नहीं है, परन्तु जिसके वचन युक्तिसंगत हों उसी का ग्रहण करना चाहिए।

—हरिभद्रसूरि, लोकतत्त्वनिर्णय, 1.38

जैनदर्शने स्याद्वादः

–माणिक्यचन्द्रः कौन्देयो न्यायाचार्यः

निर्बाधसम्विदितसूक्तिसुधाः स्रवन्ती।
संशीतिविभ्रमविमोहतमांसि हन्त्री।
जीवादितत्त्वकुमुदानि विबोधयन्ती।
स्याद्वादगीः शशिविभा धिनुतात् त्रिलोकीम्।।

ऊर्ध्वमध्याधस्तात् त्रिजगदुद्धरणाप्रतिहताप्रतिमनिःप्रतिद्वन्द्वसामर्थ्यजुष्टा, भक्तिभारविनतसंख्यातीतसुत्रामप्रमुखानेकलेखमुकुटमाणिक्यमणिमयूखमालारुणीकृतपादपद्माः, प्रणतषट्खण्डस्थामरनृतिर्यग्जीवाक्षुण्णशासनाधिकारिचक्रभृन्मण्ड लेश्वराभरणारत्नमरीचिजालबालातमञ्जरीपिञ्जनखमरीचिपुञ्जर्शञ्जता, नारकिणामपि सम्यग्दर्शनसहोत्थसद्बोधसमयनिष्ठध्यातव्यविषयतामापन्ना, अष्टाधिकसहस्रश्रीवर्द्धमानभगवन्तः सम्यग्ज्ञानमेव चरमफलनिःश्रेयसप्रापकाव्यभिचारिकारणतावच्छेदकावलीढधर्मावच्छिन्नं, त्रिकालत्रिलोकाबाधितपथप्रस्थाय्यपारपारा वारसंसारसमुत्तरणपोतायमानमुपदिदिशुः।

तत्रापि विश्वज्ञानप्रपितामहोपमानं श्रुतज्ञानं मुक्त्यव्यवाहितात्मभूतान्वयाव्य तिरेकशालिताशक्तिसमन्वितं त्रिविष्टपढक्काढौकितं उट्टङ्कितनिःकिट्टका लिकाकान्तिशातकुम्भमिवाहार्याप्रामाण्याज्ञानानास्कन्दित विमर्षणामन्थराचल सञ्चालनपरिक्षुब्धविद्यावारिधिमन्थनोद्युक्तविबुधमनस्सु नितरामुद्योतते चमत्कृतिजनकतावच्छेदकाक्तममितामोदामृतप्रदम्।

अनादिकालीनपावनवाच्यवाचकसम्बन्धमात्मसात्कुर्वतोः श्रुतज्ञानस्याद्वादयोर्वृत्त्यनियामकाविनाभावसम्बन्धभृद्विषमा व्याप्तिः प्रतियोगितावच्छेदक सम्बन्धापन्नप्रतियोग्यनधिकरणीभूतहेत्वधिकरणावृत्त्यभावप्रतियोगितासामान्य निष्ठसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वसाध्यतावच्छेदकधर्मावच्छिन्न

त्वोभयाभावस्तत्प्रयुक्तसम्बन्धधर्मावच्छिन्नहेतुना सहान्यथानुपपत्तिस्वरूपो च्चैस्तटमकण्टकमटयते।

परावबोधनोत्कृष्टपरोपकारतपोनिष्ठमहर्षिप्रज्ञप्तं मानवमनोगतदुरवधानदुर्भि क्षोत्क्षेपपरिक्षमपरमार्थसदुपदेशपयोधाराधाराधरायमाणमागमप्रामाण्यं स्वतः समुद्भूतसमुत्साहसन्दोहमदोलायमानयद्यत्वे भास्वद् भास्करप्रभेव प्रकाशते प्रमातृप्रमितिप्रमेयरूपम्।

शाब्दप्रमाणामन्तरा मूकवाग्मिरासभरटनेषु भेदं न पारयन्ति स्थूलबुद्धयोऽपि वावदूकाः किमुत तीक्ष्णप्रज्ञा मनीषिणाः।

सार्वसर्वज्ञातीन्द्रियज्ञानविकले कलावयमेव ते पितेति मातृवाक्यादन्य त्प्रमाणं नास्ति प्रत्यक्षलैङ्गिकार्थापत्त्यैतिह्योपमानादि।

परस्परविरुद्धनानाप्रवादिप्रवादप्रकटनप्रतिविधानप्रगुणपटुः स्याद्वादरवि रहर्निशं प्रतिवादिप्रतिसिद्धान्तध्वान्तपलायनकलाकलितं विसंवादिखद्योतद्यु- तिविघटनं चकास्तितराम्।

आलापपद्यावलिस्रोतोनुप्रविष्टविवादापन्नस्याद्वादसम्वादसम्वाद- परीवादप्रवादानुवादापवादेष्वेकतमः स्याद्वाद एव सश्लाघादरं जगन्मूर्ध्नि चूड़ामणीयते निःशेषविष्टपनिविष्टद्विष्टै कान्तकण्ठकोत्पाटनपटुर्विघ्न विदारणमंगलविधानाभ्याम्।

प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः इति न्यायनियम विद्भ्यः प्रतिस्वभावमापत्तिप्रतिव्यूढप्रतिपत्तिजनकसद्धेतुमालामद्घोषयन् स्याद्वादो नितराम् रोचते, बुभुक्षितभोजनभट्टेभ्यः क्षीरान्नपिच्छिलदधिपरिकरित साज्यरसभरितमोदकपूर इव मिथ्याभिनिवेशतीव्रबुभुक्षानिरसनभटः क्षुत्क्षाम कुक्षिपूरकः।

प्रतिवस्तुपर्यायमस्तिनास्त्येकानेकभेदाभेदनित्यत्वानित्यत्व प्रभृतिसप्तभङ्गी- भागीरथीमवतारयन्नणोरपि निरंशत्वे मेरुसर्षपसाम्यप्रसङ्ग बिभीषिकां सांशत्वे ऽनवस्थाव्याघ्रीसाध्वसञ्चापसारयन् स्याद्वादेश्वरस्त्रिलोक्यां विभ्राजते।

हृद्यानवद्यविद्यावित्त्या कथञ्चिद्वादविद्विद्वानेकान्तधर्मग्रहाग्रहग्रहणमूलरागा

दिदोषानपहरन् कर्माष्टककाष्ठनिर्दहनजुष्टोऽष्टगुणाधारमुक्तधराधिष्ठितो निरारेकभवेदित्यनन्तानन्ताविभागिप्रतिच्छेदधारिमहत्प्रमोदावसर:।

गवेतरासमेवतत्वे सति सकलगोसमवेतगोत्वसामानाधिकरण्येन गोत्वावच्छेदकावच्छेदेनेति गावि गोत्वा मुतागवि गोत्वं चेदनर्थकं नृष्वस्मासु गोत्वविरोधादगव चेद्गोत्वं भवत्स्वपि गोत्वमास्तामिति व्याघातनिग्रहस्थानाद्यक्षेपानेकविक्षेपात्मककटाक्षप्रक्षेपणेनान्वर्थनामा श्रुताब्धिपारग: श्रुताब्धिपारग: श्रुतसागरमुनिरखण्डामोघनययोजनिकाजय्यप्रणाल्या स्याद्वादानभिज्ञान् साटोपं तरुणाबलीवर्दोपमितिब्रुवाणान् वलिप्रभृतिसचिवान् सभ्यसभापतिवादिप्रतिवादिचतुरङ्गसंघट्टनाप्रचुरे शास्त्रार्थे मंक्षु तिरश्चकार:।

क्षणिकक्षेमकरदारकटाक्षाक्षताक्षत्वेप्यक्षोभमोक्षक्षेत्रस्थाक्षरमुक्तिलच्मी-साक्षाद्वीक्षणाकांक्षा विक्षेप सप्रेक्षा, दोषोरगध्वांक्षक्षेपका: क्षान्तिदक्ष काष्ठाम्बरभिक्षवो मंक्ष्वीक्षन्ते स्याद्वादचर्यपक्षच्छायाश्रयिणारताम्।

स्याद्वादपदवाच्यानेकान्तस्वरूपधर्मस्वभावागुणपर्यायाणाम् प्रतिपादक-विक्षावशदृष्टिकोणगतानां नयोपनीययमान् मिथ:सापेक्षाणां विरोधसंशय-व्यथतिकरानवस्थावैयधिकरणप्रभृतिविविधदोषानालीढानां सावैभौमप्रियता न केनापि निवारयितुं शक्यते।।

गङ्गायां घोषोऽत्र वाच्यार्थलक्ष्यार्थव्यङ्ग्यार्थवाच्याभिधानवृत्तिभिर्भ गीरथरथखातावच्छिन्नागंगावतराचलसमुद्रावधिजलप्रवाहसुरदीघिकातीरशीतत्व पावनातिशयार्थोभिधाने स्यांद्वाद एव शरणं रघशिरस्ताडं पूत्कृर्वतो प्याप्तं।

विरोधाभासापन्नानां गौणमुख्ययोर्मुख्ये सम्प्रत्यय: कृत्रिमाकृत्रिमयो: कृत्रिमे सम्प्रत्यय: देशभाषायामापि ''ओस चाटने से प्यास नहीं बुझती, डूबते को तिनके का सहारा अच्छा, बिन मांगे मोती मिले मांगे मिले न भीख, बिना रोये माता भी दूध नहीं पिलाती'' इत्याद्यपरिमितार्थभृतपरिभाषा वाक्यानां फलार्थिपुरुषप्रवृत्तिनिवृत्तिमूलसम्प्रतिपत्ति: स्याद्वादपथेनैव प्रतीतिशिखरिशिखरारूढा भवतीति निरारेकं सुनिश्चितं सामोदं नश्चेत:।

दार्शनिकेषु नितांतबावदूकवैतण्डिकजाल्पिकरूपानेकनाटककलाक-लितकलकलायमाननैयायिककाणादा: नव्यन्यायनिर्वृत्तिनिपुणा निरर्थकाल्पार्थ-

कावच्छेदकावच्छिन्नप्रतियोगितानुयोगिताधारताधेयताविधयितानिरूपिता प्रभृत्यबहुसारकटुकाठिन्यसम्पादकवाचकप्रयोगोच्चारणचणा स्ततोन्ये पूर्वोत्तर मीमांसासांख्यपतञ्जलिबार्हस्पत्यशौद्धोदनिसरणिशरणा अपि प्रकाण्डप्रति वादिनो नाद्याप्यवगाहन्तेऽनन्तप्रमेयमाणिक्यादिमणिभृत स्याद्वादाम्बुध्यल्पीय उपतटमपि।

बुद्धिविषयतावच्छेदकत्वोपलक्षितधर्मावछिन्नस्थूलमतिकुती र्थ्यहृदयमस्तकोन्माथिनीं सूक्ष्मार्थगवेषकामन्दधिषणाधिपश्चिदाह्लादवर्धिनीं चरमपरमोपादेयमोक्षपुरुषार्थान्वयव्यतिरेकशलिकारणत्ववाहिनीं स्याद्वादवैजयन्तीं प्रसारयन्त आर्हता उच्चमस्तकं प्रद्योतन्ते योगक्षेमपारायणपरा यणाः परिचितांतरात्मपरमात्मतत्त्वाः।

नहि सन्तप्तातत‌भिः सर्वथाभेदवादिभिरिव द्रव्यद्रव्ययोः सयोगः संयोगद्रव्याःसमवायः संयोगसमवाययोर्विशेष्यविशेषणभावः समवायविशेष्य-विशेषणयोः स्वरूपसम्बन्धोरूपरसयोरेकार्थ समवाय इति लांगूलिकलंगूलव ल्लम्वायमानकल्पितसम्बन्धपरम्परानवस्थाचमूरीचंक्रमणाक्रांतेष्यते स्याद्वादिभिः कथञ्चित्तादात्म्यात्मकसबन्धपीयूषवाराशिनिमग्नवपुर्मिर्जिनहिमाचलोद्भवर याद्वादवाग्गङ्गा प्रवाहावगाहनपवित्रान्तःकरणैः।

श्रीवर्द्धमानमनुपरिपूर्णाधिकारं न्यायशास्त्रकृतो भावितीर्थङ्करविभूतिभृत श्रीसमन्तभद्रसूरयोऽन्ययोगव्यवछेदकायोगव्यवच्छेदकात्यन्तायोगव्यवच्छेदकैवकारं प्रयुक्तमप्रयुक्तं वा स्याद्वादसहचारिणं नितांतावश्यकमामनन्त्यन्यथानुक्तसमत्वा पत्त्यापादनेनावधीरयन्ति प्रतिवादिपण्डितान्।

पार्थ एव धुनर्धरः पार्थ एव पार्थो धनुर्धरो भवत्येववज्जरायुजाण्डजपोतानां गर्भो गर्भ एव जरायुजाण्डजपोतानामेतेषां गर्भजन्म भवत्येवेत्यत्रोद्देश्यतावच्छे दकसमानाधिकरणात्यन्ताभावाप्रतियोगित्वादि लक्षितैवकारोपयोजना प्रमितिज नकतावच्छेदकापन्नप्रमाणभृत्प्रमातृविद्वत्सम्विद्विषयतामियर्त्ति।

समघनचतुरस्राकारानन्तानन्तरज्जुविस्तारायामावगाहधार्याकाशवद्वंहीयसि स्याद्वादः गम्भीरोदारोदरे आसत्तियोग्यताकांक्षातात्पर्यव्याकरणोपमानकोषाप्तवाक्य पदार्थबोधादिशाब्दबोधजनकसामग्री अभिनिविष्टास्तीति नास्माकमत्रातितरामादरः खण्डनमण्डनविधौ।

लक्ष्यलक्षणाप्रकरणेष्वप्युपयोगो लक्षणमित्यादौ लक्ष्यतावच्छेदकसमाना धिकरणत्वे सति लक्ष्यतावच्छेदकावच्छिन्नप्रतियोगिताकभेदसामानाधिकरण्य मतिव्याप्तिलक्ष्यतावच्छेदकसमानाधिकरणात्यन्ताभावप्रतियोगित्वाव्याप्त्यादिल क्ष्मदोषरिक्तं पूर्वमनुस्याद्वादैवकारपदप्रतिष्ठितं लक्षणं त्रिलोकाबाधितं कक्षीकुर्वन्ति लक्ष्यलक्षणभावविदो धैर्यधारिधीधना विचक्षणाविपश्चितः संगरितविपक्षपक्षक्षय दक्षाः स्वकीयसच्चरित्रपवित्रकीर्त्तिकौमुदीसमासादितप्रियमिष्टशिष्टाक्लिष्ट वचनप्रयोगप्रीतिप्रसराः।

क्वाचित्कपुण्यदेशभाविशारदी वृष्टिरिव, कादाचित्कसिद्धचक्रपूजन-प्रवृत्ति रिव अनेकभिषग्वर्यान्यतमसाध्यपारदीसिद्धिरिव माकन्दमंजरीमकरन्द-विन्दुस्यन्दिस्याद्वादानुस्यूतवचनप्रणाली सुदुर्लभा।

धर्मान्तरादानोपेक्षाहानिलक्षणत्वात्प्रमाणनयदुर्णयानामिति निष्कलंका-कलंकोक्त्या सम्यङ्मिथ्यैकान्तानेकान्तवत् स्याद्वादयोजनप्रक्रियापि पुद्गलो रूपवान्, मुक्ताः केवलज्ञानिनो, देवदत्तो विद्वान्, जिनदत्तो धनाढ्य इत्यादिवाक्येषु द्वैविध्यमश्नुते।

अनल्पानन्तानन्तानेकान्तेषु संख्यातशब्दनिष्ठवाचकतानिरूपितवाच्य-तावन्तः स्याद्वादाभिहिता धर्मा परिगणिताः सन्ति परमल्पीयःसंख्याकैरभि-धायकैः सातिशयश्रुतज्ञानावरणक्षयोपशमशालिनां प्रमातृणामनन्तप्रमेयप्रति पत्तिर्भवतीति महच्चित्रम्। लघुपरिमाणावच्छिन्नवटवीजमिव लघीयान् सद्वादः महापरिमाणाक्तप्लक्षद्रु श्रुतज्ञानं जनयत्प्रपितामहायते कैवल्यस्यापि, प्रथमोपशम सम्यक्त्वदृष्टिर्यथानिःश्रेयसोत्पत्तौ मातामहीयते चेत्यालोचनप्रतिक्रमणप्रत्या ख्यानप्रत्याहारधारणासनसमाधिध्यानाधिष्ठैर्धार्मिकैरनारतं ध्येयः।

परमार्थग्राहिनिश्चयव्यवहारनयप्रमाणकृतानुचिन्तनप्रणुन्नैर्निमित्तो पादानकारणाकसम्वित्त्युत्पत्तिव्यवस्थापादकैरर्थव्यंजनयोगसंक्रान्त्याक्रान्तधर्म्य-ध्यानरतैरनुक्षणं परिशील्यतां स्याद्वादः आत्मनीननानावस्तुस्वभाववाचन्प्रवणः सर्वथैकान्तत्यागचणः सप्तभंगनयापेक्षो मोक्षोपयोगिप्रलम्बकर्मनिर्जरकनिश्चयन-योत्पादकान्तर्जल्पमयो हेयादेयविशेषकः साक्षात्प्रत्यक्षकेवलज्ञानमिव साक्षात्सर्वतत्त्वप्रकाशकः।

स्याद्वादाम्बुध्येकशः सीकरग्राहिनानाप्रवादिनो हरिद्राग्रन्थिग्राहिमूषक वणिगिव स्वमताभिनिवेशमदमत्ता अद्याप्युपासते तमेव व्यापकवपुषं सापेक्षानेक धर्मवकुशं ऋद्धिसिद्धिवृद्धिप्रापकम्।

सुरेन्द्राख्यबंगाल्येवं ब्रूयाद्विश्वे वंगवासिनोऽलीकाभिधायिनः सन्ति, शाब्दबोधप्रणल्या वाचो स्यास्तात्पर्यमेतावन्मात्रं वितथभाषणदोषारोपणपरं प्रतिभाति परंच सुरेन्द्रोपि वंगदेशवासी सोपि स्वकीयप्रतिज्ञावशंवर्त्तितयानृतवचन शीलः तथा च तदध्यारोपितं वंगीयेष्वसत्यवादित्वमप्यसत्यं, ततोन्यथानुपपत्ति-रूपार्थापत्त्या वंगप्रांतीयमनुजाः सत्यवादिनः इति सम्प्राप्ताः सत्यलाच्छनस्याद्वा दसंस्कृत्योपर्युक्तवाक्यस्योभ्यार्थप्रतीतिरखिलापामरजनप्रसिद्धाटीकामन्तरोदृङ्कयते भटिति।

हिताहितसम्यग्गवेषणा संचेतनाविरहितो गर्दभ एव विजयां न भुनक्तीत्यत्र रासभोपि विजयां नात्तीति एवकार स्थानेऽपि पदपरिवर्त्तनेन स्याद्वादमुद्रांकितप-रत्वेन मादपदार्थत्यागनियमिनियमव्यवस्था स्थीयते।

कृतकारितानुमतसंरम्भसमारम्भारम्भत्रियोगाभ्यासोद्‌भूतसाम्परायिकास्रव निरोधहेतु चित्‌चैतन्यचमत्कारसंचेतनात्मसंवरपरिणामैरुदितोदीयमानोदेष्यमा-णकर्मनिर्जरणसमर्थसहजस्फारप्रभाभासुरशुद्धज्ञानघनोन्तरात्मा नानासप्त-भङ्गीनयनयननीयमानस्फुरज्ज्योतिः स्फूर्जति अतिगहनतरात्मतत्त्वार्थरत्नपुंज परिपूर्णतर्कमंजूषोद्‌घाटनकर्मठकुं चिकाभूतः।

शब्दस्फोटपदस्फोटवाक्यस्फोटवादिवैयाकरणाभिप्रेतव्युत्पन्नाव्युत्पन्न शब्दपक्षकक्षीकरणेन क्षणिककालान्तरस्थायिपदार्थद्वयोररीकुर्वाणसौगतमतप्रति पत्त्याथवा द्वैताद्वैतप्रदिसौत्रान्तिकवैभाषिकविवेकपद्धत्या ज्ञानशब्दात्माद्वैता नुविद्धपरिपाट्या च विशालस्याद्वादप्लक्षवृत्तस्वच्छच्छायामाश्रयन्ति पतदञ्ज लिपतञ्जलिप्रभृतयस्तीरादर्शिपोतकाकन्यायमनुकुर्वाणा अनेकविधश्रुतिस्मृती तिहासपुराणव्याकरणन्यायतर्कमीमांसासाहित्यनानाविधशास्त्राध्ययनाध्यापनर्यालोचनाः।

''यदा यदा हि धर्मस्य ग्लानिर्भवति भारत'', ''न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः'' इतिकर्तृवादाकर्तृवादविपञ्च्चीघोषा घोषणां कुर्वती भगवत्स्वोपज्ञगीताभारती यथा स्याद्वादं प्रतिपाद्य प्रतिपत्तिं विदधाति वैष्णाव सम्प्रदायाश्रितानां प्रत्यवायविरोधिनित्यनैमित्तिककर्मानुष्ठायिनामणोरणीयान्महतो

महीयानित्यध्येतृणां बाधप्रतिबन्धतावच्छेदकोभूतस्वनिष्ठविषयिताघटित-धर्मावच्छिन्नप्रतिबन्धकतानिरूपितासाध्यवत्तानिश्चयत्वव्यापकप्रतिबन्धका-निरूपितप्रतिबध्यतावच्छेदकावच्छिन्नशालिज्ञानरूपसंशयनिराकरणपरा।

पितृत्वपुत्रत्वमातुलत्वभागिनेयत्वप्रभृतिसापेक्षवादसम्बन्धिष्विव पौराणिकाभीष्टगजाननरसिंहोदाहरणेषु कापिलाभिप्रेतसत्त्वरजस्तमसां साम्यावस्थाप्रकृतितत्त्वे मेचकरसापन्नपाकने विचित्रचित्रपटे च स्यात्पदानुयोज निकानिवार्यमाणा केवलान्वयिनो छायेवानुगच्छति प्रतिपदं। समाधिसाधन-साधकसाधव इव प्राज्ञा: समयसारैकान्तरसिका स्वात्मानं श्रेण्यारोहणम्मन्य माना: अनुक्षणां परिशुद्धज्ञानमात्रैकभावनाभावितान्त:करणा: स्वेच्छोच्छल त्पुष्कलोच्चानल्पविकल्पमालामात्मकर्मद्वयावच्छिन्नप्रयोगकुशलकुलिशोपमास्याद्वा दाञ्चितभेदज्ञानबलेन तीक्ष्णापरशुनेव भवपाशाशावल्लरी छिन्दन्तोतन्त्यात्मान आत्मन: आत्मभिरात्मभ्य: आत्मन आत्मस्वेवं षट्कारकाध्यात्मैकताना:।

पश्चिमाशावर्त्त्यस्ताचलोप्युदयाद्रितामियर्त्ति सर्वेषां वर्षाणां मेरुरुत्तरत: स्थित इत्यखण्डज्योतिष्कसिद्धांतप्रक्रियया भारतवर्षीयजनोक्तसामंकालीनर व्यस्तकाल: पश्चिमविदेहस्थमानवानां प्रात:कालीन सूर्योदयवेलोद्घोष्यते वैश्वानरदग्धनरमनलसेको लाभप्रद: जललेपश्च कष्टप्रद: विषस्य विषमौषधमित्याद्यलौकिकलौकिकानिदर्शनप्रदर्शनेन स्याद्वादवल्ली वेष्टयति त्रिविष्टपं, किं बहुना संज्ञ्यसुभृदखिलवचनप्रणाली सूत्रानुस्यूत निर्मलवृत्तमौक्तिकस्रगिव स्याद्वादांकितगीरखिलस्थावरजंगमजङ्गदभिव्याप्य विद्वज्जनमानसविहारिम रालहृदयेषु नितरां नितांतमुद्भासते इति।

श्रेष्ठित्व, पण्डितत्व, दातृत्व, पात्रत्व, गृहपतित्वोदासीनत्व, जिनभक्तिनिपुणत्व, आत्मचिन्तनचेतयितृत्व, अन्तर्जागृतत्व, वहि:सुप्तत्व, शुद्धद्रव्याभ्यासित्व, अशुद्धद्रव्यकथनीविरतत्व, विद्वद्गोष्टीचर्चित्व विजनतायां स्वात्मपरिशीलनपरत्व, अन्त: प्रमाणोपपन्नाकलंकाचार्यप्रणीतप्रमेयप्रेमित्वऽपि बहि:कानजीस्वाम्युक्तनिश्चयनयच्यार्थनिवध्यासनोन्मुखत्वप्रभृति स्वच्छसमुच्छलदच्छलधर्माध्यासप्रणाल्या स्याद्वादगुम्फितया नानागुणनिष्ठा धेयतानिरूपिताधिकरणतामधिकुर्वाण: सर श्रेष्ठिवर्य हुकुमचन्द्रमहोदय अतिशेरते गङ्गजीवननंद नचन्दनलसच्छुभ्रगुणाढय धार्मिकनृन्।

प्रलम्बाजवञ्जमदिवर्त्तनकर्त्तनविध्वंसनपटुजिनधर्मप्रभावना, चैतन्यचिच्चिन्तनानन्दस्वादप्रवर्त्तना सद्विद्यहृद्यनिरयद्यगद्यहृद्यनिरवद्यगद्यपद्यमय जिनशासनवेदि विद्वद्वृन्दसद्गोष्ठीचैतषाम् प्रवर्द्धन्ताम् धर्मशास्त्राभ्यासानु-मननशीलता च।।

स्याद्वादोन्नतवर्द्धमानहिमवत्पद्मांगतो निसृता।
स्वान्यज्ञप्तिधृताजटाक्तजिनभृद् द्वीपांगविद्गौतमात्।
सन्तप्तात्महिताप्यकुण्डवदुमा स्वाम्याननाद्वाहिता।
नास्त्यस्त्यादिकणान्विकीर्यजिनवाग्गङ्गा पुनात्वाशु नः।।

पिउ-पुत्त-णत्तु-भव्वय-भाऊणं एगपुरिससंबंधो।
ण य सो एगस्स पिय त्ति सेसयाणं पिया होइ।।
–समणसुत्तं, गाथा 670

एक ही पुरुष में पिता, पुत्र, पौत्र, भानेज, भाई आदि अनेक सम्बन्ध होते हैं। एक ही समय में वह अपने पिता का पुत्र और अपने पुत्र का पिता होता है। अतः एक का पिता होने से वह सबका पिता नहीं होता। (यही स्थिति सब वस्तुओं की है।)

न्यायदर्शनरीत्या स्याद्वादसमीक्षा

–प्रो. पीयूषकान्तदीक्षितः*

स्याद्वादः जैनदर्शनस्य मन्ये तादृशः कश्चन विशिष्टो वादो यादृशश्चार्वाकदर्शनस्य सर्वजनसिद्धः स्वभाववादः। लोकसिद्धे स्वाभाववादे यथा विदुषां मति- र्नानुरज्यते तथैवात्र स्याद्वादेऽपि कदाचित् सुधियां भवति विमतिः। वस्तुतो वादः प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रह एव भवति। स्यादस्तीत्यादिरूपेण सुप्रसिद्धे स्याद्वादेऽपि स्यादस्ति अथवा स्यान्नास्तीत्यादयः सप्तविकल्पाः अहमहमिकया प्रस्तुता नूनं प्रमाणैस्तर्कैश्च किञ्चित् साधयितुं निषेद्धुं वा प्रवृत्ता भवन्ति, यत् किमप्यत्र संसाध्यते सः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षग्रहात्मकः प्रतिपक्षसङ्ग्रहात्मको वा भवतीति स्यान्मुखेनोद्यतस्य विचारजातस्य वादत्वं निष्प्रत्यूहं सिद्ध्यतीति ध्येयम्।

वादोऽयं श्वेताम्बरदिगम्बरजैनसम्प्रदायसाधारण इति विशेषतोऽवधेयम्। श्वेताम्बराणां परिचितिः रजोहरणमुखपट्टिकाकेशलुञ्चनादिकेन लिङ्गेन, चोलपट्टककल्पाख्येन अङ्गवस्त्रादिवेषविशेषेण, पञ्चविधसमित्यात्मकेन त्रिविधगुप्त्यात्मकेनाचारेण च भवति। श्वेताम्बराः गुरवः अहिंसासत्यास्तेयब्रह्म-चर्याकिञ्चन्यस्वरूपैः पञ्चमहाव्रतैर्युताः, क्रोधलोभमोहादिभिरन्तरङ्गरिपुभि-र्विवर्जिताः, जितेन्द्रिया निर्ग्रन्थाश्च भवन्ति। एतेषामाहारः नवकोटिविशुद्धो मधुकर्या वृत्त्या स्वीकृतो भवति। वस्त्रपात्रविशेषादिसन्धारणं तावदेतेषां संयमपरिपालनार्थमेवेति सुनिश्चितं तथ्यम्। स्वभक्तैरभिवन्दिता इमे 'धर्मलाभ' पदवचनेनामोघेनाशिषा भक्तान् संयोजयन्ति।

दिगम्बराणां परिचयस्तु दिगम्बरत्वेन पाणिपात्रत्वेन च सहजतया भवतीति ध्येयम्। काष्ठासङ्घ–मूलसङ्घ–माथुरसङ्घ–गोप्यसङ्घभेदेन इमे

* न्यायदर्शन विभागाध्यक्षः, श्री ला.ब.शा.रा.सं.विद्यापीठम्, नवदेहली

दिगम्बरा गुरवश्चतुर्धा प्रसिद्धाः। काष्ठासङ्घा दिगम्बराश्चमरीगोबालनिर्मितां पिच्छिकां स्थापयन्ति। मूलसङ्घ-गोप्यसङ्घसम्बद्धास्तु दिगम्बरा मयूरपिच्छपिच्छिकां सन्धारयन्ति। काष्ठ-मूल-माथुरसङ्घा दिगम्बरा भक्तैरभिवन्द्यमाना 'धर्मवृद्धिम्' इति पदभाषणेन आशीर्वादं प्रयच्छन्ति। गोप्या अपि श्वेताम्बराणामिव 'धर्मलाभ' पदवचनेनैव भक्तान् तोषयन्ति। भिक्षाटने भोजने च द्वात्रिंशत् सङ्ख्याका अन्तरायाश्चतुर्दशसङ्ख्याकाश्च मलाः समान्यतया सर्वेषामेव परिवर्जनीया विशेषतया भवन्ति। एवं केचनाङ्गुलिपरिगणनीया एव भेदा जैनसम्प्रदाययोः प्रसिद्धाः। अनयोः सम्प्रदाययोर्गुरौ, देवे, तर्केषु शास्त्रेषु स्याद्वादादिसिद्धान्तेषु च मनागपि भेदो नास्तीति नूनमवधेयम्।

जैनदर्शनानुसारञ्जगतीतले विद्यमानं वस्तुजातं तावदनन्तधर्मकं भवतीति सिद्धान्तः। वस्तुनो जैनदर्शने उत्पादव्ययध्रौव्ययुक्तत्वमेव लक्षणं स्वीक्रियते। अत्र उत्पत्तियुक्तत्वम्, व्यययुक्तत्वम्, ध्रौव्ययुक्तत्वम् वा प्रत्येकं वस्तुनो लक्षणन्निर्दुष्टन्न सम्भवतीति 'उत्पादव्ययध्रौव्यैः समुदितैर्युक्तत्वमेव वस्तुनो लक्षणमिति निर्धारणीयम्। वस्तुनोऽनन्तधर्मकत्वमेव मन्ये स्याद्वादस्य पुष्टा पृष्ठभूमिः।

संसारेऽस्मिन् प्रमाविषयत्वेन प्रमेयत्वेन वा यत् किमपि प्रसिद्धं तत् सर्वं खलु वस्त्वनन्तधर्मात्मकमिति युक्त्या सिद्धत्येव। यः पुरुषः एकं वस्तु सर्वविधैः पर्यायैः जानाति स नियमेन सर्वमुपजानाति। यतः सर्वोपलब्धिमन्तरा विज्ञातुमभिलषितस्यैकस्य स्वपर्याय-परपर्यायभेदभिन्नस्य सर्वात्मनावबोधस्य स्वयं बृहस्पतेरप्यसम्भवात्। यः पुरुषः सर्वात्मना सर्वं वस्तुजातं साक्षादवगच्छति स एकमपि वस्तु स्वपरपर्यायभेदेन सर्वथा भिन्नं विजानात्येव। प्रोक्तञ्च-

एको भावः सर्वथा येन दृष्टः
सर्वे भावाः सर्वथा तेन दृष्टाः।
सर्वे भावाः सर्वथा येन दृष्टाः
एको भावः सर्वथा तेन दृष्टः॥

जे एगं जाणइ से सव्वं जाणइ। जे सव्वं जाणइ से एगं जाणइ॥

जैनदर्शनानुसारं प्रमाणं प्रत्यक्षं परोक्षञ्चेति द्विविधम् स्वीकृतम्। अनन्तधर्मकं वस्तु एव तावत् प्रमाणविषयतां याति। उक्तञ्च श्रीहरिभद्रसूरिणा षड्दर्शनसमुच्चये–

प्रत्यक्षञ्च परोक्षञ्च द्वे प्रमाणे तथा मते।
अनन्तधर्मकं वस्तु प्रमाणविषयस्त्विह॥[1] इति

अनन्ताः त्रिकालविषयत्वात् अपरिमिता धर्माः-स्वभावाः सहभाविनः क्रमभाविनश्च स्व-पर-पर्याया यस्मिन् तदनन्तधर्मं वस्तु एव भवति। अनन्तधर्मशब्दात् स्वार्थे यदा क प्रत्ययो भवति तदाऽनन्तधर्मकमिति शब्दो निष्पद्यते। अनन्तधर्मकमिति शब्दस्यार्थस्तु अनेकान्तात्मकं वस्तु एव वस्तुतः सिद्ध्यति।

अथवा अनेके अन्ता अंशा धर्मा वा, आत्मा स्वरूपं यस्य तदनेकान्तात्मकमिति व्युत्पत्या वाऽनेकान्तात्मकमिति पदं वस्तुमात्रवाचकं प्रसिद्ध्यतीति ध्येयम्। सन्दर्भेऽस्मिन् **वस्तुपदवाच्यं** सचेतनम् अचेतनं च **सर्वं द्रव्यं भवतीति** विभावनीयम्। जैनदर्शने **जीवाऽजीवाऽस्त्रवबन्ध-संवरनिर्जरामोक्षपुण्याऽपुण्य**भेदेन प्रथितेषु नवधा विभक्तेषु तत्त्वेषु[2] **जीवाऽजीवयोः द्रव्यत्वं** स्वीक्रियते। जीवस्तावच्चेतनालक्षणोऽनुमतः पुनरजीवस्तु चेतनाभिन्नत्वेनैवात्र सम्मतः। एवंस्वरूपयोरेव जीवाऽजीवद्रव्ययोः जगद्वर्तिनः सर्वेपि भावाः समाहिता भवन्तीति वस्तुनोऽनन्तधर्मात्मकत्वमपि व्यवस्थितं सिद्ध्यति। यथा नैयायिका ज्ञानादीनां रूपरसादिचतुर्विंशतिङ्ख्याकानां गुणानां, कर्मणामुत्क्षेपणादिभेदेन पञ्चधा विभक्तानां, समवायविशेषसमवायानां च द्रव्याश्रितत्वमभ्युपयन्ति न तथा जैनाचार्या, एतेषां जगतीतले द्रव्यमतिरिच्य एकान्ततः कुत्राप्यनुपलम्भादिति ध्येयम्।

यद्यप्याऽऽस्त्रवबन्धसंवरनिर्जरामोक्षपुण्याऽपुण्यपदार्थानामपि जीवाऽजीवयोरेवान्तर्भावः निर्दिष्टकारणादेव कथं नानुमतो जैनानामिति संशयो नूनमुदेति परं नैवमाशङ्कनीयम्, पुण्याऽपुण्यं पुरस्कृत्य सन्दिग्धानां पुरुषाणां विप्रतिपत्तिनिरासप्रयोजनकत्वेन पुण्यापुण्यतत्त्वस्य पृथक्

निरूपणीयत्वात्। सकारणसंसारमुक्ति- हेतुप्रतिपादनमुद्दिश्य च आस्रवसंवरनिर्जरमोक्षाणामपि पार्थक्येनोपन्या- सस्तत्त्वरूपेण जैनाचार्याणां युक्तियुक्त एवेति विभावनीयम्।

अधुनैकस्मिन्नेव वस्तुनि अनन्ता धर्मा कथं प्रतिभासन्त इति संशयोऽवतरति। संशयोऽयमेवं समाधेयः – प्रमाणप्रमेयस्वरूपस्य सकलस्य क्रमाऽक्रमभाविनोऽनन्तधर्मात्मकस्यैकस्वरूपात्मकस्य वस्तुनः स्वद्रव्यापेक्षया परद्रव्यापेक्षया च सर्वेषु स्थलेषु सर्वेषु कालेषु च समेषामेव पुरुषाणां प्रतीतिर्जायमाना दृश्यते। सुवर्णघटदृष्टान्तमुखेन तथ्यमिदं सविस्तरमेवं विज्ञेयम्–

जनानां प्रतीतिविषयो घटः स्व-द्रव्य-क्षेत्र-काल-भावैर्विद्यते, पर-द्रव्य-क्षेत्र-काल-भावैश्च न विद्यते इति वस्तुस्थितिः। फलतोऽयं घटः यदा स्ववृत्ति सत्त्व-ज्ञेयत्व-प्रमेयत्वाभिधेयत्वादिधर्मैर्विचार्यते तदा तस्य सत्त्वादयस्तावत् स्वपर्याया एव घटे तिष्ठन्ति। स्थितावस्यां केचनापि परपर्यायाः परधर्मा वाऽत्र घटे नैव तिष्ठन्तीति विज्ञेयम्। स्थितावस्यां संसारेऽस्मिन् सर्वस्य वस्तुनः सत्त्वादीन् धर्मानधिकृत्य सजातीयत्वात् सत्त्वादिस्वधर्मैः संसारे विजातीयस्यैवाभावान्न कुतोऽपि व्यावृत्तिर्घटेऽनुभूयते।

यदा तु पौद्गलिको घटो द्रव्यतः प्रतीतिविषयो भवति, तदा घटोऽयं पौद्गलिकद्रव्यत्वेन अस्तित्वमवाप्नोति परं धर्माऽधर्माऽऽकाशकालद्रव्यत्वैस्तु नास्त्येव। पौद्गलिकत्वं तावदत्र स्वपर्याय इति ध्येयम्। अत्र घटस्य धर्मादिभ्योऽनन्तेभ्यो व्यावृत्तत्वेन परपर्यायास्त्वनन्ता एव जीवद्रव्याणामनन्तत्वात्। पौद्गलिकोऽप्ययं पार्थिवघटः पार्थिवत्वेन त्वस्ति परं जलीयत्वादिरूपेण नास्ति। अत्र पार्थिवत्वं स्व-घटपर्यायः, जलीयादिद्रव्येभ्यस्तु नैकेभ्यो व्यावृत्तिः पार्थिवघटस्य स्पष्टा एव। फलतः परपर्याया अनन्ताः सन्तीति बोध्यम्। एवमेव बहुविधा स्वस्मिन् विद्यमाना स्वपर्याया स्वस्माद्व्यावृत्ताः परस्मिन् विद्यमाना धर्माः परपर्यायास्समुन्नेयाः। अत्र स्वपर्यायानपेक्ष्य परपर्याया अनन्ता अधिकसङ्ख्याकाश्च भवन्तीति ऊह्यम्। **पार्थिवोऽयं घटः धातुरूपेण स्वपर्यायेणास्ति न तु मृत्तिकात्वेन।** धातुस्वरूपोऽप्ययं सुवर्णघटः सौवर्णत्वेन स्वपर्यायेणास्ति परं रजतत्वरूपेण परपर्यायेण नास्ति। सौवर्णोऽप्ययं घटः सुवर्णपट्टिकानिर्मितत्वेनास्ति खनिविद्यमानेन तावदपरिष्कृतस्वर्णात्मकत्वेन

नास्ति। घटितसुवर्णात्मकत्वेन विद्यमानोऽप्ययं चित्रदत्तनिर्मितोऽयं घटो न विचित्रदत्तनिर्मितघटितसुवर्णात्मकत्वेनास्ति। चित्रदत्तस्वर्णकारस्वर्णेन घटितोऽपि घटः कम्बुग्रीवाद्याकारेणास्ति न पुनर्मकुटाद्याकारेणास्ति। कम्बुग्रीवाद्याकारोऽपि घटः वर्त्तुलाकारेणाऽस्ति न तावदवर्त्तुलाकारेण। वर्त्तुलाकारोऽप्ययं घटः स्वाकारेणास्ति न पुनर्भिन्नघटाद्याकारेण। स्वाकारोऽप्ययं घटः स्वोत्पादकपरमाणुविनिर्मितवर्त्तुलाकारैरस्ति भिन्नपरमाणुविनिर्मिवर्त्तुला-कारैर्नास्त्येव।

एवमेव घटे बहवः स्वधर्मा परधर्माश्च भवन्ति यदा सहैव एकेनैव शब्देन घटस्यास्य विवक्षा जायते तदा घटोऽयमवक्तव्यताकोटौ समापतति विरुद्धयोः स्वपरधर्मयोर्वाचकस्यैकस्य शब्दविशेषस्य संसारेऽत्यन्तमभावात्।

एवमेकः स्वर्णघटः कथमनन्तधर्मात्मकः स्याद्वादविषयोऽने-कान्तवादमण्डितो वा लोके भवतीति आविद्वदङ्गनागोपालं सिद्ध्यति। एवमेव क्षेत्रतः कालतो भावतः परिणामतः प्रतिवस्त्वनेकान्तताऽनुशीलनीया चिन्तकैः।

प्रमाणवाक्यैः नयवाक्यैश्च वस्तुन्यनन्तधर्माणां सिद्धिः स्वीक्रियते। प्रमाणवाक्यानि तावत् सकलादेशपदव्यपदेश्यानि भवन्ति। एवमेव नयवाक्यानि विकलादेशपदेनाभिधीयन्ते। पदार्थधर्माणां कालाऽऽत्मस्वरूपार्थसम्बन्धो-पकारगुणिदेशसंसर्गानपेक्ष्य अभेदरूपेण वचनं सकलादेशो भवति। एवं कालात्मरूपादेर्भेदविवक्षया पदार्थधर्माणां निरूपणं विकलादेशत्वेनाभ्युपगम्यते। स्यादस्ति, स्यान्नास्ति, स्यादवक्तव्यः, स्यादस्त्यवक्तव्यः, स्यान्नास्त्यवक्तव्यः, स्यादस्तिनास्त्यवक्तव्य इत्येवं प्रकारेण सकलादेशा विकलादेशाः, प्रमाणसप्तभङ्गिनयसप्तभङ्गिरूपाः प्रातिस्विकरूपेण सप्तधा[3] विभज्यन्ते।विरोध-वैयधिकरण्यानवस्था-सङ्कर-व्यतिकर-संशयाप्रतिप-त्त्य-भावादयो दोषा अपि सप्तभङ्गीनयेऽस्मिन्न भवन्तीति विशेषोऽनुसन्धेयः।

द्रव्यार्थिकनयापेक्षया वस्तु नित्यं सामान्यमवाच्यं सच्च भवति पर्यायार्थिकनयापेक्षया चाऽनित्यं विशेषो वाच्यमसच्च भवति। फलतो नित्याऽनित्य-सामान्यविशेष-अभिलाप्यानभिलाप्य-सदसद्वादानान्तावत् समावेशो स्याद्वाद आञ्जस्येन जायते। नयस्वरूपाणां समस्तानामेकान्तवादानां

समन्वयकः स्याद्वादसिद्धान्त एव सम्भवदुक्तिकः । वस्तुनोऽनन्तेषु धर्मेषु एकस्मिन् काले कमप्येकं धर्ममपेक्ष्य वस्तुनः प्रतिपादनमेव नयपदेन प्रोच्यते। अत एव यावन्ति वचनानि एवंविधानि तावन्त एव नयास्तावदसंख्याता भवन्ति। सामान्यतया नैगम–सङ्ग्रह–व्यवहार–ऋजुसूत्र–शब्द–समभिरूढैवम्भूताः सप्तधा विभक्ता नया जैनदर्शने प्रथिताः। न्यायवैशेषिकमतानुयायिनस्तु नैगमनयमेव मन्वते। अद्वैतिनः साङ्ख्याश्च सङ्ग्रहनयमेवानुकुर्वन्ति। चार्वाका व्यवहारनयानुरोधेन प्रवर्त्तन्ते। बौद्धास्तावत् ऋजूसूत्रनयानुयायिनः। वैयाकरणाः खलु केवलं शब्दनयमेवानुमन्यन्ते। प्रमाणन्तु वस्तुतः सर्वनयरूपं स्वीक्रियते। नयवाक्येषु स्यात्पदयोजनपुरस्सरं वचनमेव प्रमाणशब्दाभिधानं लभते। सर्वाणि दर्शनानि नयवादगर्भितानि मतानि। यदा नयस्वरूपाणि दर्शनानि परस्परनिरपेक्षभावभावितानि वस्तु प्रतिपादयन्ति तदेमानि दर्शनानि परसमयशब्देन व्यवह्रितानि भवन्ति। यथा सर्वा नद्यः समुद्रमुपयान्ति तथा समस्तानि शास्त्राण्यप्यनेकान्तदर्शन एव समवयन्तीति जैनदर्शनं स्वसमयपदवाच्यतामवाप्नोतीत्यार्हतसिद्धान्तः।

वस्तुतस्तु समेषां न्यावैशेषिकादिदार्शनिकानां सिद्धान्ता अस्माभिर्नूनं समादरणीयाः। यदि जैनदर्शने न्यायवैशेषिकदर्शने वा परस्परं स्वसिद्धान्तविशेषस्य सागरोपमताप्रतिपादनमुखेन प्रशंसा अन्येषां दार्शनिकमतानां निन्दा वा भवति तर्हि वस्तुतः एतत् सर्वं निन्दामुद्दिश्य नैव प्रवर्त्तते प्रत्युत स्वपक्षेऽन्तेवासिनां स्थैर्यस्थापनधियैवेयं भवति। फलतः सर्वाणि न्यायवैशेषिकप्रमुखानि दर्शनानि एकमेव लक्ष्यं पुरस्कृत्य प्रवृत्तानि भेदस्तु सामान्यैः प्रतिपदमनुभूयमानो मात्रं मार्गभेदात्मक एवेत्यस्माभिर्दृढं निर्धारणीयमेव।

प्रायः सर्वेषु दर्शनेषु कस्यापि तत्त्वज्ञानार्थं लक्षणं विधीयते यथा आत्मनः न्यायदर्शने लक्षणं ज्ञानम्, येन लक्षणेन लक्षणस्य प्रयोजनं प्रायः सर्वत्र स्वीकृतं व्यावृत्तिव्यवहाररूपं सिद्ध्यति। व्यावृत्तिस्तादितरभेदानुमितिरूपा जैनैरपि स्वीक्रियत एव। यदि अनयाऽनुमित्या एव वस्तुनः तत्त्वं ज्ञातु शक्यं तर्हि स्याद्वादप्रमाणेन तत्त्वसाधनं नितान्तं भ्रामकमित्यापत्तिरपि वज्रलेपायमाना तिष्ठत्येव। आपाततस्तु एकत्र विरुद्धनानाधर्मप्रकारकं ज्ञानमस्तित्वनास्तित्वादिना जायमानं जनेषु संशयं जनयिष्यतीति भवति

स्याद्वादस्वीकरण आरोप: यस्य समाधानं चिन्त्यम्। किं वैशेषिकै: 'साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्नि:श्रेयसाधिगम' इत्येव दर्शितं तत्त्वज्ञानसाधननिरूपणं स्याद्वादमपेक्ष्य नोत्कृष्टम्? जीवाऽजीवयोरेव समेषां समावेशाद्यथा जैनाचार्यैरन्यान्यपि तत्त्वानि उद्देश्यविशेषं पुरस्कृत्य पृथक्तया निरूपितानि तथैव अन्यैरपि दार्शनिकै: विशिष्टं तावदनितरसाधारणं प्रयोजनमुद्दिश्यैव गुणकर्मसामान्यविशेषसमवायाभावानां द्रव्यातिरिक्तानां तत्त्वानां निरूपणं कृतमिति अभ्युगमे कश्चन आक्षेपो न कथमपि समुचित:? एवंविधा: जिज्ञासा अस्माभि: संवादमुखेन नूनं समिल्य तावदायत्यां समाधेया:।

---

1 षड्दर्शनसमुच्चय, कारिका 55 पृ.312

2 'जीवाजीवौ तथा पुण्यं पापमास्रवसंवरौ, बन्धो विनिर्जरामोक्षौ नवतत्त्वानि मन्यते।' –ष.द.समु. का.47 पृ. 211

3 अथ केऽमी सप्तभङ्गा: कश्चायमादेशभेद इति? उच्यते। एकत्र जीवादौ वस्तुनि ऐकैकसत्त्वादिधर्मविषयप्रश्नवशाद् अविरोधेन प्रत्याक्षादिबाधापरिहारेण पृथग्भूतयो: समुदितयोश्च विधिनिषेधयो: पर्यालोचनया कृत्वा स्याच्छब्दलाञ्छितो वक्ष्यमाणै: सप्तभि: प्रकारैर्वचनविन्यास: सप्तभङ्गीति गीयते। तद्यथा। 1. स्यादस्त्येव सर्वमिति विधिकल्पनया प्रथमो भङ्ग:।

2. स्यान्नास्त्येव सर्वमिति निषेधकल्पनया द्वितीय:।

3. स्यादस्त्येव स्यान्नास्त्येवेति क्रमतो विधिनिषेधकल्पनया तृतीय:।

4. स्यादवक्तव्यमेवेति विधिनिषेधकल्पनया चतुर्थ:।

5. स्यादस्त्येव स्यादवक्तव्यमेवेति विधिकल्पनया युगपद्विधिनिषेधकल्पनया च पञ्चम:।

6. स्यान्नास्त्येव स्यादवक्तव्यमेवेति निषेधकल्पनया युगपद्विधिनिषेधकल्पनया च षष्ठ:।

7. स्यादस्त्येव स्यान्नास्त्येव स्यादवक्तव्यमेवेति क्रमतो विधिनिषेधकल्पनया युगपद्विधिनिषेधकल्पनया च सप्तम:। स्याद्वादमञ्जरी, श्लो.23 पृ. 209-210

जैनागमेषु स्याद्वादः वेदान्तश्च

–प्रो. शुद्धानन्दपाठकः*

जैनागमेषु स्याद्वादस्य सप्तभङ्गानां वर्णनं द्रव्यं गुणः पर्यायः नयश्चेत्यादिशब्दानां दृश्यते।

प्रथमशताब्द्यामपि आचार्य–उमास्वामिमहाभागानां तत्त्वार्थसूत्रेषु अपि अनेकान्तवादस्य नयवादस्य च चर्चा विशेषरूपेण वर्तते किन्तु स्याद्वादस्य सप्तभङ्गानामुल्लेखो नास्ति।

सप्तभङ्गानां नामानि सर्वप्रथमं कुन्दकुन्दमहोदयानां पञ्चास्तिकाये प्रवचनसारे च मिलन्ति। किन्तु स्पष्टरूपेण प्रतिपादनं चतुर्थशताब्दौ सिद्धसेनदिवाकरेण समन्तभद्रेण च कृतम्। अष्टमशताब्द्याम् अकलंकेन हरिभद्रेण च अस्य ''स्याद्वादस्य'' सूक्ष्मातिसूक्ष्मस्वरूपं प्रतिपादितम्। अस्य वादस्योपरि ये आक्षेपा आसन् यथा एषः संशयवादः वर्तते अत्र विरोधः दरीदृश्यते इत्यादयः तेषां सर्वेषामाक्षेपाणां निराकरणं तत्त्वार्थराजवार्तिके सिद्धविनिश्चये अनेकान्तजयपताकाग्रन्थे शास्त्रवार्तासमुच्चये च कृतमिति। नवमशताब्द्यां विद्यानन्देन तत्त्वार्थश्लोकवार्तिकम्–अष्टसहस्त्रीम्–आप्तरीक्षां च न्यायशास्त्रानुकूलशैल्यां विलिख्य स्याद्वादस्य समर्थनं प्रतिपादनञ्च कृतम्।

अन्ते चाष्टादशशताब्द्याम् उपाध्याय–यशोविजयमहोदयेन स्याद्वादः सार्वतान्त्रिकः इति घोषणा कृता। स्याद्वादसमर्थनाय वैदिकमुदाहरणं दीयते यथा 'नासदासीत् नो सदासीत्तदानीम्'[1], 'तदेजति तन्नैजति तद्दूरे तद्वन्तिके[2]', 'अणोरणीयान् महतो महीयान्[3]' इति।

स्याद्वादः सर्वेषां दर्शनानां सत्तां स्वीकरोति, सम्पूर्णदर्शनं नयवादे

---

* आचार्यः, अद्वैतवेदान्तविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली

समन्वितं भवति। अतः उच्यते–

बौद्धानामृजुसूत्रतो मतमभूद्वेदान्तिनां संग्रहात्
सांख्यानां तत एव नैगमनयाद् योगश्च वैशेषिकः।
शब्दब्रह्मविदोऽपि शब्दनयतः सर्वैर्नयैर्गुम्फिता
जैनी दृष्टिरितीह सारतरता प्रत्यक्षमुद्रीक्ष्यते।।[4]

अधुना स्वसमयपरिकल्पितः स्याद्वादः प्रतिपाद्यते। जैनदर्शने आचार्याः सप्तभङ्गीनयं वर्णयन्ति। (1) स्यादस्ति (2) स्यान्नास्ति (3) स्यादस्ति च नास्ति च (4) स्यादवक्तव्यः (5) स्यादस्ति चावक्तव्यः (6) स्यान्नास्ति चावक्तव्यः (7) स्यादस्ति च नास्ति चावक्तव्यश्चेति।

(1) स्यादस्ति–एव वस्तु इति विधिकल्पनया उच्यते, इति प्रथमो भङ्गः। 'स्यादस्ति जीवः' अर्थात् स्वापेक्षया जीवः अस्तित्वरूपः एवास्ति। भङ्गेऽस्मिन् द्रव्यार्थिकनयस्य प्रधानता, पर्यायार्थिकनस्य च गौणता भवति। अत्र स्यादिति–अव्ययं कथंचिदर्थकम्। 'स्यादस्ति' इत्यस्याऽर्थो भवति कथंचिदस्ति इत्यर्थः। तत्र स्यात्कथंचित् स्वद्रव्य–क्षेत्र–काल भावरूपेणास्त्येव सर्व घटादि, न पुनः परद्रव्य–क्षेत्र–काल–भावपेण। तथाहि घटः द्रव्यतः पार्थिवत्वेनाऽस्ति, न जलादिरूपेण। क्षेत्रतः–नवदेहलीत्वेनाऽस्ति, न तु हरिद्वारत्वेन। कालतः वसन्तत्वेनास्ति, ग्रीष्मत्वेन नास्ति। भावतः– श्यामत्वेनाऽस्ति, रक्तादित्वेन नास्ति। इति प्रथमो भंगः।

(2) स्यान्नास्त्येव सर्वमिति निषेधकल्पनया द्वितीयो भङ्गः। 'स्यान्नास्ति जीवः' अन्यस्याऽपेक्षया जीवः नास्ति। भङ्गेस्मिन् पर्यायार्थिकनयस्य मुख्यता, द्रव्यार्थिकनयस्य गौणता वर्तते। जीवः परसत्ताऽभावाऽपेक्षया मुख्यत्वेन नास्तिरूपो वर्तते। स्वसत्ताभावापेक्षया गौणत्वेनास्तिरूपो वर्तते।

(3) स्यादस्त्येव स्यान्नास्त्येवेति क्रमतो विधिनिषेधकल्पनया तृतीयो भंगः। स्यादस्ति च नास्ति च जीवः। जीवः कथंचित् अस्तित्वरूपः कथंचित् नास्तिस्वरूपः। अत्र द्रव्यार्थिकनयस्य पर्यायार्थिकनस्य च द्वयोरपि प्राधान्यं वर्तते। यदा वक्ता अस्तित्वनास्तित्वधर्मविषये कथयितुमिच्छति तदा अस्य भङ्गस्य प्रयोगो भवति।

(4) स्यादवक्तव्यः–स्यादवक्तव्यमेवेति युगपद्विधिनिषेधकल्पनया चतुर्थो भङ्गः। स्यादवक्तव्यो जीवः। भङ्गेऽस्मिन् द्रव्यार्थिकनयस्य पर्यायार्थिकनयस्य च द्वयोरपि–अप्रधानता वर्तते। अस्तित्वनास्तित्वधर्मद्वयस्य मुख्यरूपेण एकस्मिन्समये एव कथनं न भवितुमर्हति, एकशब्देन अनेकगुणानां वर्णनं नहि भवति, अतः अस्तित्वनास्तित्वधर्मापेक्षया कथंचित् जीवः अवक्तव्यः इति।

(5) स्यादस्ति–अवक्तव्यः–स्यादस्त्येव स्यादवक्तयमेवेति विधिकल्प–नया, युगपद्विधिनिषेधकल्पनया च पञ्चमः। स्यादस्ति च अवक्तव्यश्च जीवः। जीवः कथंचित् अस्तिरूपः अवक्तव्यरूपश्च वर्तते। अस्मिन् भङ्गे द्रव्यार्थिकनयस्य प्रधानता। एवञ्च द्रव्यार्थिकपर्यायार्थिक– नययोरप्रधानता वर्तते।

(6) स्यान्नास्ति–अवक्तव्यः-स्यान्नास्त्येव स्यादवक्तव्यमेवेति निषेधकल्पनया युगपन्निषेधकल्पनया च षष्ठः। स्यान्नास्ति च अवक्तव्यश्च जीवः। जीवः कथंचित् नास्तिरूपः, अवक्तव्यरूपश्च वर्तते। अस्मिन् भङ्गे पर्यायार्थिकनयस्य प्रधानता एवञ्च द्रव्यार्थिकपर्यायार्थिकनयद्वयस्य अप्रधानता। जीवः पर्यायाऽपेक्षया नास्तिरूपोऽस्ति, तथा च अस्तित्वनास्तित्वधर्मद्वय–स्याऽभेदविवक्षयाऽवक्तव्यस्वरूपश्च वर्तते।

(7) स्यादस्ति नास्ति अवक्तव्यश्च। स्यादस्त्येव स्यान्नास्त्येव स्यादवक्तव्यमेवेति क्रमतो विधिनिषेधकल्पनया, युगपद्विधिनिषेधकल्पनया च सप्तमः। जीवः कथंचित् अस्ति, कथंचित् नास्ति, कथंचित् अवक्तव्यश्चाऽस्ति। जीवो द्रव्यापेक्षयाऽस्ति, पर्यायाऽपेक्षया नास्ति, द्रव्य–पर्याययोः सहैवाऽपेक्षया अवक्तव्यरूपश्च जीवो वर्तते इति।

एतदेव निरूपणं स्याद्वादस्य कृतं जैनदर्शने।

तत्रोच्यते भगवत्पादैः शंकराचार्यैः नायमभ्युपगमो युक्तः, 'कुतः' एकस्मिन्नसंभवात् न ह्येकस्मिन्धर्मिणि युगपत्सदसत्त्वादिविरुद्धधर्मसमावेशः सम्भवति, शीतोष्णवत्। जीवाजीवाऽऽस्रवसंवरनिर्जरबन्धमोक्षाः एते सप्त पदार्थाः निर्धारिता एतावन्त एवंरूपाश्चेति ते तथैव वा स्युः नैव वा तथा

स्यु:। इतरथा हि तथा वा स्यु:, अतथा वा, इति अनिर्धारितरूपमेव ज्ञानं संशयज्ञानवत् अप्रमाणमेव स्यात्।

सप्तपदार्थानां सप्तत्वसंख्या स्यादस्ति, स्यान्नास्ति। पञ्चास्तिकायानां पञ्चत्वसंख्याऽस्ति वा नास्ति। पदार्थानाम् अवक्तव्यत्वमपि न भवितुमर्हति। अवक्तव्याश्चेन्नोच्येरन्। उच्यन्ते च अवक्तव्याश्चेति विप्रतिषिद्धम्। जैनदर्शनं सम्यक् दर्शनं स्यात् न वा स्यात्। इत्यादिकं सर्वं संशयात्मकमेव वर्तते ''संशयात्मा विनश्यति'' इत्येषैव स्थिति: स्याद्वादस्य। इति शम्।

सन्दर्भ

1. ऋग्वेद 10-129-1
2. ईशावास्योपनिषत् 51
3. कठोपनिषत् 2-201
4. अध्यात्मसार: जिनमतस्तुति:।

णियमणिसेहणसीलो,
णिपादणादो य जो हु खलु सिद्धो।
सो सियसद्दो भणिओ,
जो सावेक्खं पलाहेदि॥

–समणसुत्तं, गाथा - 715

जो सदा नियम का निषेध करता है और निपात रूप से सिद्ध है, उस शब्द को 'स्यात्' कहा गया है। यह वस्तु को सापेक्ष सिद्ध करता है।

काश्मीरशैवदर्शनदिशा स्याद्वादसमीक्षणम्

–प्रो. हरेरामत्रिपाठी*

स्याद्वाद: जैनेतरदर्शनानां समन्वयं करोति। जैनदर्शनस्य विद्वांस: वदन्ति यत् सर्वाणि दर्शनानि नयापेक्षया सत्यानि सन्ति नयवादगर्भिततत्वात्। ऋजूसूत्रनयापेक्षया बौद्धदर्शनस्य, संग्रहनयापेक्षया वेदान्तदर्शनस्य, नैगमनयापेक्षया न्यायवैशेषिकदर्शनयो:, शब्दनयापेक्षया शब्दब्रह्मवादिन: वैयाकरणस्य व्यवहारनयापेक्षया चार्वाकदर्शनस्य च सत्यत्वं स्वीकर्तुं शक्यते। अत एव मल्लिषेणसूरिणोक्तम्[1]–

प्रतिक्षणोत्पादविनाशयोगिस्थिरैकमध्यक्षणपीक्षमाण:।
जिन त्वदाज्ञामवमन्यते य: स वातकी नाथ पिशाचकी वा॥

अर्थात् हे नाथ! प्रतिक्षणोत्पन्नविनष्टपदार्थानां प्रत्यक्षेण स्थिरं दृष्ट्वा वातरोगग्रस्ता: वा पिशाचसदृशा: जीवा: भवदाज्ञाया तिरस्कारं कुर्वन्ति इति।

सर्वे पदार्था: उत्पादव्ययध्रौव्यस्वरूपा: सन्ति। यतोहि स्याद्वाद-मञ्जरीकारैरुक्तम्–

घटमौलिसुवर्णार्थी नाशोत्पादस्थितिष्वयम्।
शोकप्रमोदमाध्यस्थ्यं, जनो याति सहेतुकम्॥[2]

स्याद्वाद: इत्यत्र शब्दद्वयं विद्यते स्यात् वादश्च। स्यात् शब्दस्तु तिङन्तप्रतिरूपनिपातो विद्यते। तस्य अनेकान्त:, विधि: विचारश्चेति अनेकार्थो भवति। अत्रानेकान्तार्थो: विवक्षित:। तत्त्वबुभुत्सो: कथा वाद:। जैनन्यायशास्त्रे परामर्शरूपेण सप्तवाक्यानां प्रयोगो भवति। अयमेव सप्तभङ्गीनय: इत्यनेनोच्यते। भङ्गशब्दार्थ: समुच्चय: यत्र अस्तित्वस्य, नास्तित्वस्य च एकदैव समुच्चयो जायते स च सप्तभङ्गीनय इत्यनेनोच्यते। सांख्यादिसप्तदार्शनिकेभ्य:

---

* आचार्य: सर्वदर्शनविभागे, श्री ला.ब.शा.रा.सं. विद्यापीठम्, नवदेहली

प्रतिपादितस्य एकान्तवादस्य भङ्गं सम्पाद्य अनेकान्तवादस्योपस्थापनत्वात् सप्तभङ्गीनयः इति डॉ. उमाशङ्कर[3] शर्मा "ऋषिः" भणति। सप्तभङ्गीनयस्तु अधोलिखितानि सन्ति–

1. स्यादस्ति।

2. स्यान्नास्ति।

3. स्यादस्ति च नास्ति च।

4. स्यादवक्तव्यः।

5. स्यादस्ति चावक्तव्यः।[4]

6. स्यान्नास्ति चावक्तव्यः।

7. स्यादस्ति च नास्ति चावक्तव्यः।

सत्कार्यवादिनः सांख्याः पदार्थानां[5] सत्तां स्वीकुवन्ति। शून्यवादिनः बौद्धाः पदार्थानामसत्तां स्वीकुर्वन्ति। असत्कार्यवादिनः नैयायिकाः उत्पत्तेः प्राग् पदार्थस्याभावम् उत्पत्त्यनन्तरं भावं, ध्वंसानन्तरं कार्यद्रव्यस्य अभावञ्च स्वीकुर्वन्ति। कालभेदेन सत्तामसत्ताञ्चाभ्युगच्छन्ति। "ब्रह्मसत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः" इति स्वीकुर्वन्तः अद्वैतवेदान्तिनः जगतः उपादानं कारणं माया वर्तत इति वदन्ति सा च माया न सद् न असद् ज्ञानविरोधी भावस्वरूपा सत्त्वरजस्तमस्स्वरूपा अनिर्वचनीया विद्यत इति वदन्ति। माया यदि मिथ्या वर्तते तदा ततः जायमानाः सर्वे पदार्थाः प्रतीतिकालेऽपि नास्ति। तत्र केचन मायावादिनः सांख्योक्तपदार्थानां सत्तां स्वीकृत्य जगदिदमनिर्वचनीयमिति वदन्ति। तत्र केचन सत्त्वासत्वाभ्यां सह मायिकानिर्वचनीयत्वमाहुः।

एतेषां दर्शनानां ये सिद्धान्ताः सन्ति तत्र जैनाः स्यादित्यस्य सन्निवेशं कृत्वा स्वविचारमुपस्थापयन्ति। अत एव अनन्तवीर्यः अवदत्–

तद्विधानविवक्षायां स्यादस्तीति गतिर्भवेत्।
स्यान्नास्तीति प्रयोगः स्यात्तन्निषेधे विवक्षिते॥

क्रमेणोभयवाञ्छायां प्रयोगः समुदायभाक्।
युगपत्तद्विवक्षायां स्यादवाच्यमशक्तितः॥
आद्यावाच्यविवक्षायां पञ्चमो भङ्ग इष्यते।
अन्त्यावाच्यविवक्षायां षष्ठभङ्गसमुद्भवः॥
समुच्चयेन युक्तश्च सप्तो भङ्ग उच्यते॥[6] इति॥

स्यादिति पदमेकनिपातमस्ति तिङन्तरूपेण व्यवह्रियते। अनिश्चयस्य द्योतकोऽयमिति। स्यात्पदं सार्थकमस्ति क्रियावत् दृश्यते अनिश्चयस्य व्यञ्जकं भवति तत्र अस्तित्वविधेयस्य विशेषणमस्ति। श्रीमद्विमलदासेन सप्तभङ्गीनयस्य लक्षणमित्थमुक्तम्–

प्राश्निकप्रश्नज्ञान[7]प्रयोज्यत्वे सति, एकवस्तुविशेष्यकाविरुद्धविधि–प्रतिषेधात्मकधर्मप्रकारकबोधजनकसप्तवाक्यपर्याप्तसमुदायत्वमिति। परम्परया प्राश्निकप्रश्नज्ञानजन्यत्वमेव प्राश्निकप्रश्नज्ञानप्रयोज्यत्वमिति। कश्चन शिष्यः गुरुं प्रति पृच्छति घटः अस्ति? तदनन्तरं शिष्यस्य प्रश्नज्ञानात् गुरोः विवक्षा जायते विवक्षया गुरुः वाक्यप्रयोगं करोति। "स्याद् अस्त्वेव घटः"[8] अत्र घटविशेष्यक अविरुद्धविध्यादिप्रकारकं यज्ज्ञानं घटोऽस्ति इत्येवं रूपम् तज्जनकञ्च यत् "स्यादस्त्येव घटः" इति वाक्यमिति एवमन्यान्यपि वाक्यानि इत्थं भवन्ति इति।

स्यान्नास्त्येव घटः, स्यादस्ति नास्ति च घटः, स्यादवक्तव्य एव घटः, स्यादस्ति चावक्तव्यश्च घटः, स्यान्नास्ति चावक्तव्यश्च घटः, स्यादस्ति नास्ति चावक्तव्यश्च घटः इति। अत्र केचन सप्तभङ्गीनयस्य लक्षणं कुर्वन्ति 'प्रश्नवशादेकत्र वस्तुनि अविरोधेन[9] विधिप्रतिषेधकल्पना सप्तभङ्गी इति। पञ्चम्यर्थः प्रयोज्यत्वम् विधिप्रतिषेधकल्पना इति वाक्यस्यार्थः विधिप्रतिषेधप्रकारकबोधजनिका तृतीयार्थः वैशिष्ट्यम् तस्य विधिप्रतिषेधयोरन्वयः, वस्तुनि इत्यत्र सप्तम्यर्थः विशेष्यत्वम् कल्पनापदार्थः बोधजनकत्वम् तस्यैकदेशे बोधे विशेष्यत्वस्य अन्वयः तथा च प्रश्नवशप्रयोज्यैकवस्तुनिष्ठविशेष्यता निरूपित अविरोधविशिष्टविधिप्रतिषेधनिष्ठ प्रकारता निरूपित बोधजनकसप्तवाक्यपर्याप्तसमुदायत्वाश्रयत्वम् सप्तभङ्गीनयस्य लक्षणमिति। सप्तविधैव जिज्ञासा भवति इति कथम्

उच्यते संशयाः सप्तविधा एव भवन्ति। अतः तद्विषयीभूतधर्मा अपि सप्तविधाः भवन्ति। ते च धर्माः कथञ्चित्सत्त्वम्, कथञ्चिदसत्त्वम्, क्रमार्पितोभयम्, अवक्तव्यम् कथञ्चित्सत्त्वविशिष्टावक्तव्यत्वम्, कथञ्चिदसत्त्वविशिष्टावक्तव्यत्वम्, क्रमार्पितोभयविशिष्टावक्तव्यत्वम्, च इति। प्रथमे भङ्गे सत्त्वस्य मुख्यरूपेण प्रतीतिः द्वितीये भङ्गे पुनरसत्त्वस्य प्रतीतिः तृतीये भङ्गे क्रमार्पितयोः सत्त्वासत्त्वयोः प्रतीतिः, चतुर्थे तु अवक्तव्यत्वस्य प्रतीतिः पञ्चमे भङ्गे सत्त्वविशिष्टावक्तव्यत्वस्य प्रतीतिः, षष्ठे च असत्त्वविशिष्टावक्तव्यत्वस्य प्रतीतिः, सप्तमे भङ्गे क्रमार्पितसत्त्वासत्त्वविशिष्टावक्तव्यत्वस्य प्रतीतिश्च जायते इति श्रीमद्विमलदासोऽपि वदति।[10] काश्मीरशैवदर्शनस्यादिमो ग्रन्थः शिवदृष्टिः विद्यते। तत्र षट्त्रिंशत्तत्त्वानि भवन्ति। तत्र परमतत्त्वमस्ति शिवः शिवस्य शक्तिः शिवादभिन्ना वर्तते, ततः जगदुत्पद्यते इति। यतोहि सोमानन्देनोक्तम्–

आत्मैव सर्वभावेषु स्फुरन्निवृत्तचिद्विभुः।
अनिरुद्धेच्छाप्रसरः प्रसरद दृक्क्रियः शिवः।।[11]

सर्वभावेषु स्वात्मैव शिव इति व्यवहर्तव्यम् निर्वृतचिद् इत्यादि-विशेषणकलापादिति। स्फुरन्निति धर्मिणो हेतोश्च स्वसंवेदनप्रत्यक्षं प्रमाणम्। चिद्रूपस्य शिवस्य स्वभावो वर्तते यः विभवः पञ्चविधकृत्यनिर्वृत्तियोग्यता।

शिवस्तु परमतत्त्वं पशुस्तु जीवः स च ग्राहकः पशुः पुर्यष्टकावच्छिन्नं चैतन्यम्, स एव परिमितत्वादणुः चैतन्यात्मतया नित्यः अमूर्तश्च, विश्वात्मतात्यागेनाज्ञः, अस्वातन्त्र्यात् क्रियागुणरहितः अनीश्वरश्च, वेद्यपुर्यष्टात्मनि भिन्न इव रागितया भोगोपायविचिन्तको, मायाकृतत्वात् मायोदरान्तःस्थः। स्वशिवत्वाज्ञानं शिवभट्टारकस्यायुक्तम्, नित्यनिर्मल-स्वभावत्वात्, तदविना मलानामेवानुत्पत्तेस्तदधिष्ठानात्तेषाम्। ततः तद्ज्ञानभागणुः तदैव मायाशक्तिवशात् उत्तिष्ठतीत्याणवमायामलद्वयोद्भवः। कार्ममलश्च तत्प्रभवः। स्वशिवत्वमिवेति इव ग्रहणं व्यपदेशग्रहणं च अज्ञानात्मकमेतत् न वस्तुतः कश्चित् ग्राह्यग्राहकभेद इति वक्तुं शक्यते इति उत्पन्नदेवोऽपि वदति।[12]

काश्मीरशैवदर्शनन्तु वास्तविकरूपेण एकतत्त्वं सदाशिवं स्वीकरोति ततः पञ्चत्रिंशत्तत्त्वानि जायन्त इति। सदाशिवतः अनेकानि तत्त्वानि जायन्त अतः इदं वक्तुं शक्यते यत् यद्यपि मुख्यरूपेण वा पारमार्थिकरूपेण एकतत्त्वस्य प्रतिपादकत्वेऽपि गौणरूपेण अनेकतत्त्वानां प्रतिपादकत्वात् सप्तभङ्गीनयस्यापि निरूपणमत्र दरीदृश्यते इति। अत एवोक्तं सोमानन्देन "अथास्माकं ज्ञानशक्तिर्या सदाशिवरूपता"[13] भिन्नोऽप्यभिन्न एवास्मि शिव इत्थं विचेष्टनम् शिवो भोक्ता शिवो भोज्यं शिवेषु शिवसाधनः।। शिवः कर्ता शिवः कर्म शिवोऽस्मि करणात्मकः।।[14] शिव एव फलावस्था व्यापार इति साधुषु। भावनाकरणाभ्यां किं शिवस्य सततोदितेः।।[15]

सन्दर्भ

1. स्याद्वादमञ्जरी मङ्गलाचरणम्, पृ. 1
2. आप्तमीमांसा पृ. 56 का. 59
3. सर्वदशर्नसंग्रहः, पृ.147
4. सर्वदशर्नसंग्रहः, पृ.146
5. कारणभावाच्च सत्कार्यम्।। सां. का. सं.
6. सर्वदर्शनसंग्रहः, आर्हतदर्शनम्, पृ.149
7. सप्तभङ्गीतरङ्गिणी, पृ.3
8. सप्तभङ्गीतरङ्गिणी, पृ. 2
9. तत्रैव, पृ.3
10. सप्तभङ्गीतरङ्गिणी, पृ.9
11. शिवदृष्टिः, पृ. 4
12. शिवदृष्टिः- उत्पलदेवकृतवृत्यां द्रष्टव्यम्।
13. शिवदृष्टिः आह्निकम् द्वितीय- का. 1,
14. शिवदृष्टिः सप्तम आ. का. 99 पृ. 219
15. शिवदृष्टिः सप्तम आ. का 100, पृ. 219

भारतीयतत्त्वचिन्तने अनेकान्तवादः तत्खण्डनञ्च

–डॉ. महानन्दझाः*

अनेकान्तोप्यनेकान्तः प्रमाणनयसाधनः।
अनेकान्तः प्रमाणात्ते तदेकान्तोऽर्पितान्नयात्॥[1]

वस्तुतः अनेकान्तवादः जैनदर्शनस्य सुमेरुमणिभूतः व्यापकः सिद्धान्तः। आचार्यसिद्धसेनः प्रकाशयति एतन्महत्वम् यत् अनेकान्तवादं विना जगद्व्यवहारः नैव प्रवर्तते। प्रायः न्यायवैशेषिकादि सर्वेऽपि दार्शनिकाः येन केनापि रूपेण अनेकान्तवादसिद्धान्तं स्वीकुर्वन्ति।

तत्रेदं प्राथम्येन को नाम अनेकान्त? इति जिज्ञासायाम् सर्वमनेकान्तात्मकमिति। तत्र यदेव तत्तदेवातत्, यदेवैकं तदेवानेकं, यदेवसत् तदेवासत् यदेव नित्यं तदेवानित्यमित्येव वस्तुवस्तुत्वनिष्पादकपरस्पर-विरुद्धशक्तिद्वयप्रकाशनमनेकान्तः। अर्थात् यत्र नाना धर्माः तिष्ठन्ति, यश्च नानाधर्मात्मकः सैव अनेकान्तः, तस्यैव वादः अनेकान्तवादः। स च वादः सर्वैरपि दार्शनिकैरङ्गीक्रियते।

वैशेषिकदर्शने स्थलविशेषे अनेकान्तवादस्य सम्माननं दृश्यते। यथाहि पर, अपर, परापरभेदेन सामान्यस्य भवति त्रैविध्यम्। अधिक न्यूनवृत्तित्वरूपयोः परत्वापरत्वयोः सापेक्षत्वमपि वैशेषिकैराचायैरभिमतम्। तत्र द्रव्यगुणकर्मसु त्रिष्वपि वर्तमाना सता जातिः परा, घटपटादिवृत्तिघटत्व-पटत्वादिजातिरपरा, द्रव्यत्वगुणत्वादिजातिस्तु सत्ता जात्यपेक्षया अल्पस्थानवृत्ति-त्वादपरा घटत्वपटत्वाद्यपेक्षया अधिकदेशवृत्तित्वाच्च परा इत्थं द्रव्यत्वादौ परापरे जाती वैशेषिकैः स्वीक्रियते। उक्तञ्च विश्वनाथेन कारिकावल्याम्–

---

* सहायकाचार्यः न्यायविभागे, श्री ला.ब.शा.रा.सं.विद्यापीठम्, नवदेहली

सामान्यं द्विविधं प्रोक्तं परं चापरमेव च।
द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते।।[2]

परभिन्ना च या जातिः सैवाऽपरतयोच्यते।
द्रव्यत्वादिकजातिस्तु परापरतयोच्यते।।[3]

एवञ्च सामान्यस्य न परत्वमैकान्तिकं न वाऽपरत्वमैकान्तिकमिति वैशेषिके नये अनेकान्तवादस्य स्वीकृतिः दृश्यते।

तार्किकैः नैयायिकैः अक्षपादप्रभृतिभिरपि न्यायशास्त्रे अनेकान्तवादस्य स्थानं स्वीक्रियते। न्यायशास्त्रीयमेकं सूत्रमस्ति प्रमेयता च तुलाप्रामाण्यवदिति।[4] या हि तुला कस्यचिद्वस्तुनस्तोलनात् ज्ञापकतया ब्रजति मानताम्, सैव हि यदि तुलान्तरेण व्रजति तोलनीयतां तदा तुलान्तरं प्रमाणीकृत्य गच्छति मेयताम्। यदा मेयभूतेन वस्तुना मानभूतं वस्तु ज्ञाप्यते तदा मेयं मानतां व्रजति मानं च मेयतामिति।

यथाहि—हीरकतोलनाय निर्मिता काचन स्वर्णतुला कदाच्चिल्लोहतुलया शक्यत एव तोलयितुम्। एवञ्च सति तत्र लौहतुलातोलितायां हीरकतोलिकायां सुवर्णतुलायां नन्वेकस्यां सापेक्षतया प्रमाणत्वमपि प्रमेयत्वमपि चेति तत्र कथञ्चित् प्रमाणतायां कथञ्चिच्च प्रमेयतायामपि[5] स्वीकृतायां व्यवस्थित एवानेकान्तवादः तत्र।

नास्तिकदर्शनसोपानश्रेणीषु प्राथम्यमुपादधानाश्चार्वाकाः परमाणुपर्य्यन्तं सर्वत्र चैतन्यमभ्युपगच्छन्तोऽपि जडत्वाजडत्वयोरुभयोर्विकल्पेन जायमानस्या-पामरसाधारणस्य लोकव्यवहारस्य सिद्धये सर्वव्यापकस्य ज्ञानापरपर्यायस्य चैतन्यस्य क्वचित् स्पष्टत्वं क्वचिच्च अस्पष्टत्वमभ्युपगच्छन्ति। लोष्ठादिषु जडा एते इत्येवं जायमानस्य जडत्वव्यवहास्य सर्वेषु प्राणिषु चेतना एते इत्येवं जायमानस्य चेतनत्वव्यवहारस्य सम्पादनं भवितुं नार्हति। सति चैवमेतत् सिद्धं यत् सर्वव्यापकेऽपि चैतन्ये विकल्पेन स्पष्टत्वास्पष्टत्वयोरुभ-योरापातदृष्ट्या विरुद्धत्वेन प्रतीयमानयोः अस्तित्वमवगच्छन्ति। अतः तेऽपि स्थलविशेषे अनेकान्तवादस्य स्थापना स्वीकुर्वन्ति स्वीये दर्शने।

नहि केवलं चार्वाका अपितु बौद्धा अप्येवं प्रत्यक्षानुमानयो- रुभयोर्विकल्पेन भावाभावख्यापकतया प्रामाण्यमभ्युपगच्छन्तो विलोकयितुं शक्यन्त एव स्थलविशेषे अनेकान्तवादसमर्थनम्।

अयम्भावः- बौद्धसिद्धान्ते प्रत्यक्षं प्रति विषयस्यापेक्षिततया भावात्मकस्य विषयस्य सत्वेन भावप्रत्यक्षस्थले भवितुमर्हति प्रत्यक्षस्य प्रामाण्यम्। किन्तु अभावज्ञानस्थले अभावे व्यापकस्य सत्वस्याभावेन तद्व्याप्यस्य विषयत्वस्याप्यभावात् विषयाभावेन प्रत्यक्षस्य प्रामाण्यं न भवितुमर्हति। तत्र अभावनिर्णयः प्रतियोग्यनुपलब्धिहेतुना धूमेन हेतुना वह्निनिर्णय इव जायते। एवं सति क्वचित् प्रत्यक्षस्य प्रामाण्येऽपि क्वचिदन्यत्र न प्रामाण्यम् क्वचिच्चानुमानस्य प्रामाण्येऽपि क्वचिदन्यत्र न तस्य प्रामाण्यमिति स्वीकारेण बौद्धदर्शनेऽपि अनेकान्तवादस्य भूमिका न तिरोहिता।

यज्ञसाधनविकल्पद्वारा कर्ममीमांसकैरपि अनेकान्तवादस्य समर्थनमेव क्रियते। यथाहि यवैर्यजेतव्रीहिभिर्वायजेत इति विधिद्वय[6] विचारावसरे कदाचित् यवानां पुरोडाशादि प्रकृतितया यागसाधनत्वं कदाचिच्च व्रीहीणां यागसाधनत्वमिति स्वीकुर्वन्ति मीमांसकाः। एवमेव वैदिकविधिविचारावसरे तयोः विधिवाक्ययोः प्रामाण्याविशेषात् उत्सर्गापवादाभ्युपगमासम्भवाच्च परस्पर विपरीततया प्रतीयमानयोः एकत्रैव यागे एककर्तृकत्वमिति मीमांसासिद्धान्तः; अतः अस्मिन्नपि दर्शने अनेकान्तवादः स्वीकृत एव।

वेदान्तदर्शने तु अनेकान्तवादसिद्धान्तः सुस्पष्टतया प्रतीयते। तथाहि दृश्यमानस्य समग्रस्यापि प्रपञ्चस्य त्रिकालावाध्यतया[7] परमार्थसत्तां ब्रह्मापेक्ष्यासत्यत्वं प्रातिभासिकरज्जुसर्पशुक्तिरजतादिकमपेक्ष्य च सत्यत्वं प्रतिपादयन्ति वेदान्तिनः। अद्वैतवेदान्तसिद्धान्ते त्रिविधा सत्ता पारमार्थिकी सत्ता ब्रह्मणि, व्यावहारिकी सत्ता जगति, प्रातिभासिकी च सत्ता रज्जुसर्पशुक्तिरजतादिषु स्वीक्रियते। तासु त्रिविधसत्तासु सापेक्षत्वाभ्युपगमात् तत्रापि अनेकान्तवादस्य स्थितिः विद्यत एव।

एतावता यद्यपि प्रायः सर्वेऽपि दार्शनिकाः तत्तत्स्थलविशेषे स्याद्वादापरनामधेयस्यानेकान्तवादस्य समर्थनं संवर्द्धनञ्च कृतवन्तः तथापि

मीमांसाश्लोकवार्तिके भट्टकुमारिलेन सर्वज्ञता एवञ्च प्रमाणवार्तिके धर्मकीर्तिना अनेकान्तवादस्य खण्डनं कृतम्।

कुमारिलेनोक्तं मीमांसाश्लोकवार्तिके–

एवं यैः केवलज्ञानमिन्द्रियाद्यनपेक्षिणः।
सूक्ष्मातीतादिविषयं जीवस्य परिकल्पितम्॥[8]
नर्ते तदागमात्सिद्ध्येन्न च तेनागमो विना।

अयम्भावः यत् सूक्ष्मादिविषकमतीन्द्रियं केवलज्ञानं पुरुषस्याभिमतं तज्जैनमान्यतानुसारेण आगमं विना न सिद्ध्यति, आगमश्च तद्विना नोपपद्यते। अतः सर्वज्ञत्वं परस्पराश्रयदोषेण दूषितं विद्यते। एतद्दूषणं जैनदार्शनिकैः कथं निरस्यते?

प्रमाणवार्तिके धर्मकीर्तिना अनेकान्तवादमाश्रित्याक्षेपं कृतम्–

सर्वस्योभयरूपत्वे तद्विशेषनिराकृतेः।
चोदितो दधि खादेति किमुष्ट्रं नाभिधावति॥[9]

अर्थात् समस्तं वस्तुजातं यद्यनेकान्तात्मकं स्यात् तदा दधि भोक्तुमाज्ञप्तः उष्ट्रमत्तुं कथं नाभिधावति? भगवान् बुद्धः पूर्वजन्मनि मृगः आसीत् अन्यस्मिन् जन्मनि स एव बुद्धः, यदि समस्तं वस्तु अनेकान्तात्मकं भवेच्चेत् कथं केनापराधेन मृगः खाद्यः कथञ्च बुद्धो वन्द्यः? अतः सर्वं वस्तु नह्यनेकान्तात्मकं भवितुं शक्नोति।

सन्दर्भ

1. स्वयंभूस्तोत्रम्-18.18
2. कारिकावली- का.सं.-8
3. कारिकावली- का.सं.-9
4. न्यायसूत्रम्- 1.2.16
5. न्यायभाष्यम्- 1.2.16
6. मीमांसापरिभाषा।
7. त्रिकालावाध्यत्वं सत्यत्वम्।
8. मीमांसाश्लोकवार्तिकम्।
9. प्रमाणवार्तिकम्।

तार्किकदृष्ट्या स्याद्वादसमालोचना

–डॉ. रामचन्द्रशर्मा*

जैनदर्शनमनेकान्तवादिदर्शनमस्ति, एतन्मतानुसारं कस्यापि वस्तुनः एकान्तेन ज्ञानं न भवितुमर्हति। सर्वस्य वस्तुनोऽनेके पक्षा भवन्ति, तेषु कस्यचित्पक्षस्यैव ज्ञानं जीवानां भवितुमर्हति। यथोक्तम्–

एकदेशविशिष्टोऽर्थो नयस्य विषयो मतः।
अनेकान्तात्मकं वस्तु गोचरं सर्वसंविदाम्॥

अतः सर्वाणि ज्ञानानि ज्ञातुर्दृष्टिकोणाधारितानि एकपक्षीयाण्येव भवन्ति। किमप्येकान्तात्मकं ज्ञानं वस्तुनः सर्वपक्षीयस्वरूपप्रकाशकं न भवितुमर्हति। अतः स्याद्वादमाश्रित्यैव वस्तुनः यथार्थस्वरूपनिर्धारणं भवितुमर्हति, नान्यथा। तद्यथा–

नयानामेकनिष्ठानां प्रवृत्तौ श्रुतवर्त्मनि।
सम्पूर्णार्थविनिश्चायि स्याद्वस्तु श्रुतमुच्यते॥[2]

अत्रविषये ''हस्तिदर्शनन्यायः समुपस्थाप्यते, तद्यथा-केचन अन्धा हस्तिनो विभिन्नानि कर्णपुच्छोदरपादात्मकानि अङ्गानि स्वस्पार्शनप्रत्यक्षेण विज्ञाय हस्तिविषयकं स्व-स्व-परमार्थस्वरूपविज्ञानं निर्धारयन्ति, यथा कर्ण-ज्ञाता ''सूर्प इव हस्ती'', पुच्छज्ञाता ''रज्जुरिव" उदरबोद्धा "भित्तिरिव" पादबोद्धा "स्तम्भ इव" इति, किन्तु वस्तु तत्तद्रूपेण भूयमानोऽपि हस्ती न समग्ररूपेण तत्तद्रूप एव, अपितु समग्ररूपता काचिद् भिन्नैवेति। एवमेव विभिन्नैकान्तवादिदर्शनान्यपि स्व-स्वसिद्धान्ततया परमार्थतत्त्वस्य एकान्ततया निर्वचनं कुर्वन्ति सन्ति परमार्थतत्त्वस्य वस्तुतः स्वरूपापोहनमेव कुर्वन्ति।

---

* सहायकाचार्यः न्यायविभागे, श्री ला.ब.शा.रा.सं.विद्यापीठम्, नवदेहली

अतो जैनदर्शनानुसारं जीवानामसर्वज्ञानां सर्वमपि ज्ञानं यत्किञ्चित्सापेक्षमेव न तु परमार्थदर्शनं, कस्यचिदपि वस्तुनः सत्ता "देश-कालभाव-गुणादिभिः सापेक्षैव गृह्यते। उदाहरणाय कस्यचित्पुरुषस्य एवं ज्ञानं भवति यत्- "अमुकनगरे बसन्ते एकः रक्तः घटः अस्ति" इति, अत्र घटः "देशतः" सापेक्षः तस्मिन् नगरे एव गृह्यते न तु अन्यत्र, "कालतः" बसन्ततौं एवास्ति नतु शीततौं, गुणतः "रक्त" एवास्ति नतु पीतः, द्रव्यतः "स्वरूपेणै" वास्ति नतु पररूपेण, इत्येवं सापेक्षतया तस्य किञ्चिद्रूपेण "अस्तित्वं", किञ्चिद्रूपेण च "नास्तित्वं" प्रतीतिपथमायाति, अतः तस्य अनिश्चयात्मिका अनेकान्तरूपतैव अवधारणीया, नतु एकान्तरूपेण तस्य सत्तास्वरूपं सिद्धान्तनीयम्। अत एवोक्तम्-

अन्योन्यपक्षप्रतिपक्षभावाद्, यथा परे मत्सरिणो प्रवादाः।
नयानशेषानविशेषमिच्छन्, न पक्षपाती समयस्तथार्हतः॥[2]

अस्य सिद्धान्तस्य संस्थापनाय सप्तभङ्गिनयः समुपस्थाप्यते। तद्यथा–

"स्यादस्ति, स्यान्नास्ति, स्यादस्ति च नास्ति च, स्यादवक्तव्यः, स्यादस्ति चावक्तव्यः, स्यान्नास्ति चावक्तव्यः, स्यादस्ति च नास्तिचाक्तव्यः।" - इति।

अत्र "स्यात्" इति शब्दो निपातः तिङन्तप्रतिरूपकोऽनेकान्त-द्योतकश्चास्तीति बोध्यम यथोक्तम्–

वाक्येष्वनेकान्तद्योती गम्यं प्रति विशेषणम्।
स्यान्निपातोऽर्थयोगित्वात्तिङन्तप्रतिरूपकः॥[3]

अतः ''स्यात्'' इत्यस्य कथञ्चिदित्यर्थोऽवसेयः। तद्यथा–

स्याद्वादः सर्वथैकान्तत्यागात्किंवृत्तचिद्विधेः।[4]
सप्तभभङ्गिनयापेक्षो हेयादेयविशेषकृत्॥

अस्य नयस्य स्पष्टीकरणं कुर्वता अनन्तवीर्येण सप्तभङ्गीनां प्रयोजनं समुपदार्शितम्। तद्यथा–

तद्विधानविवक्षायां स्यादस्तीति गतिर्भवेत्।
स्यान्नास्तीति प्रयोगः स्यात्तन्निषेधे विवक्षिते।।

क्रमेणोभयवाञ्छायां प्रयोगः समुदायभाक्।
युगपत्तद्विवक्षायां स्यादवाच्यमशक्तितः।।

आद्यावाच्यविवक्षायां पञ्चमो भङ्ग इष्यते।
अन्त्यावाच्यविवक्षायां षष्ठभङ्गसमुद्भवः।।
समुच्चयेन युक्तश्च सप्तमो भङ्ग उच्यते।।[5] इति।

एतन्मते वस्तु यदि एकान्ततया सर्वदा सर्वत्र सर्वात्मना अस्ति तदा सर्वस्य सर्वेण सह सदा सम्बन्धात् उपादित्साजिहासाम्यां प्रवृत्तिनिवृत्ती न स्याताम्! अतः एकान्तपक्षः व्यवहारविरोधादनुभवविरुद्ध एव, अनेकान्त-पक्षे तु वस्तुनः सदा सापेक्षभावात् कयाचिदपेक्षया तत् कदाचित्, केनचित्, कथञ्चिदुपादतुं हातुं वा शक्यते। इत्येवं व्यवहारानुरोधेन सामञ्जस्याय अनेकान्तपक्ष एव श्लाघीयान् इत्येव श्रेयसः पन्था इति।

अत्र तार्किकदृष्ट्या किञ्चिद्विचार्यते। अनेकान्तदर्शनेन यदि वस्तुतः युगपत्सत्त्वमसत्त्वञ्चावधार्यते तदा तदनुभवविरुद्धं, नहि एकस्मिन् परमार्थसति परमार्थसतां युगपत्सदसत्त्वादिधर्माणां समावेशः सम्भवति। यदि उच्यते यत्सदसत्त्वयोः परस्परविरुद्धयोः समुच्चयासम्भवे विकल्पः सम्भवति इति, तदप्ययुक्तम्, ''वस्तुनि विकल्पाभावः'' क्रिया हि विकल्प्यते न तु वस्तु इति न्यायात्। यद्युच्येत, द्रव्यात्मना तस्य सत्त्वं पर्यायात्मना च तदभाव इत्युमयमप्येकस्मिन्नुपपन्नमिति, तदप्यसत्, देशकालभेदेन कस्यचित्सत्त्वम-सत्त्वं वा वस्तुनः स्वभावः, न तु समानदेशकालयोः युगपत्कस्यचित्सदसत्त्व-सम्भवः। यद् यस्मिन् देशे काले वा येन रूपेण प्रतीयमानं, तत्तस्यैकान्तिकं रूपं, तेनैव तस्य व्यवहारविषयता, नतु अन्यदेशकालसापेक्षधर्मान्तरस्य तस्मिन् तत्कालवच्छेदेन प्रतीयमानता, व्यवहारो वा। अतः तत्तद्देशकाल-सापेक्षविरुद्धधर्मावगाहनात्मकमनेकान्तदर्शनं वस्तुतोऽनुभवविरुद्धम्। यद्युच्येत यद् एकस्य वस्तुनः ह्रस्वत्वदीर्घत्ववद् अनेकान्तत्वं स्याज्जगतः इति, तदपि न युक्तम्, तत्रापि प्रतियोगिसापक्षतयैव तादृशी प्रतीतिः। यथा त्र्यणुकं द्व्यणुकापेक्षया ''दीर्घं'' चतुरणुकापेक्षया च ''ह्रस्वम्'' इति, न तु

निरूपाधिकविरुद्धधर्मत्वेन एकत्र तयोः प्रतीतिः। घटादिवस्तुविषयं सापेक्षं सदसत्त्वविषयकं ज्ञानं भवितुमर्हति, किन्तु जगतः सदसत्त्वविषये प्रतियोग्य-भावात्सापेक्षमनेकान्तदर्शनं न युक्तिसहम्। किञ्च-अनेकान्तपदेन "न एकान्त इति अनेकान्त" इति एकान्तप्रतियोगिकोऽभावः प्रत्याय्यते, स च स्वप्रतियोग्येकान्तज्ञानसापेक्षज्ञानविषयतयैव प्रतिभासितुं शक्नोति, निष्प्रतियोगिकाभावस्य प्रतिभासविषयत्वाभावात्। तथा च तत्प्रतियोग्येकान्त ज्ञानस्यावश्यं निरूणीयत्वात् क्वचिदेकान्तः ग्राह्य एव, स च जैनदर्शने क्व गृह्यते? इति निरूपणीयम्। यदि कुत्रचिद्गृह्यते तदा "सर्वमनेकान्तम्" इति प्रतिज्ञाभङ्गः, न गृह्यते चेत् "अनेकान्त" इति व्यवहारस्यैव लोपः।

किञ्च- अस्य सिद्धान्तस्य संस्थापको मूलभूतः सप्तभङ्गिनयः स्वयमेकान्तोऽनेकान्तो वा? यदि एकान्तस्तदा "सर्वमनेकान्तम्" इति प्रतिज्ञाव्याघातः। सोऽपि अनेकान्तश्चेत्, तस्य अनेकान्तत्वेन निश्चितस्वरूपत्वाभावात् न तस्य सिद्धान्तसाधकता इति उभयतः पाशारज्जुः स्याद्वादिनः।

अपि च पदार्थानां निश्चितसंख्यावधारणं, जीवात्मनः देहपरिमाणत्वा-वधारणन्तावदेकान्तवाद एव नत्वनेकान्तवादः। आत्मनश्चैतन्यविषयेऽप्ययं नयः सम्प्रसारणीयः, "स्याच्चेतनः" स्यादचेतन" इति, तच्च सिद्धान्तविरुद्धम्, तस्य अचेतनत्वानङ्गीकारात्। तथा च यथा आत्मनः एकान्तेन चैतन्यं देहपरिमाणत्वञ्चाङ्गीक्रियते तथा तदितराणां घटपटादीनां तद्देशकालसापेक्षै-कान्तत्वानङ्गीकारे को ह्ययं महानायासः? किञ्चानेन दार्शनिकदृष्टौ अति-शयाधानं यदभ्युदयनिःश्रेयसाय कल्प्येत? धर्मदर्शनं जीवनदर्शनञ्चाभ्युदय-निःश्रेयसहेतुत्वेन व्यवतिष्ठते तदर्थमियं प्रमाणनयचर्चा! लोके हि सर्वैरिद-मनुभूयते यत्- प्रवृत्त्यर्थं निश्चितैकान्तदर्शनमेव युज्यते, नतु सांशयिकमनेकान्तदर्शनम्, नहि कश्चिदपि- "स्यादस्ति स्यान्नास्ति" - इति विकद्धकोटिकं ज्ञानमवगाहमानः कुत्रचित्प्रवर्तते यावद् वस्तुविषयकमेककोटिकं ज्ञानं न जायते। संशयः विचाराङ्गत्वेन प्रवृत्त्यङ्गं भवितु मर्हति, किन्तु न केवलं संशयमात्रम्, संशयपूर्वकविशेषदर्शनेन "अयमित्त्थमेव" इति निश्चयानन्तरं निष्कम्प्रवृत्तिर्जायते। दर्शनञ्च यदि निष्कम्प्रवृच्यङ्गं स्यात् तदा तस्य दर्शनत्वं स्यात्! अन्यथा

निष्कम्पसफलप्रवृत्तिजनकत्वाभावाद्दर्शनाभासतैव तस्य स्वीकार्या। त्रैकालिकानन्तधर्मविज्ञापनार्थमयं नय इति चेदेकास्मिन् धर्मिणि एकदैव विरुद्धधर्मावगाहनेन न तस्यानन्तधर्मात्मकत्वप्रतीतिरपितु संशयास्पदतैवाबुध्यते!

यश्चात्र "हस्तिदर्शनन्यायो मनीषिभिः प्रयुज्यते, सोऽपि नैकान्तदर्शन-व्याघातकम्। तथाहि-अन्धस्य पूर्वं यथा अन्यसाहाय्येन हस्त्यवयसादृश्य-प्रतियोगिनां स्तम्भादीनां यथार्थप्रतीतिः तथैव चक्षुष्मत्साहाय्येन यावद्धस्तिस्पर्शनप्रत्यक्षेणायमेतावानवयवी हस्तिपदवाच्य इत्येवं यथार्थहस्ति-समग्रबोधो निष्पादयितुं शक्यते। स्वगवेषितैकदशीयतादृशज्ञानन्तु स्वप्रमाणसामर्थ्याभावकृतमेवेति मन्तव्यम्। प्रमाणसामर्थ्यञ्चसर्वथासर्वविध प्रमाणसामग्रीसंवलितत्वम्, तथा च चाक्षुषसामर्थ्यसंवलितस्य न तथैकदेशे तेन रूपेण एकान्ततया हस्तित्वप्रत्ययः, अपितु सर्वाङ्गसंवलिततादृशपिण्ड एव। अतः परमार्थदर्शनाय प्रमाणसामर्थ्यं समर्जनीयं, नतु परमार्थस्य तादृशानिश्चयदर्शनमेव दर्शनत्वेनाङ्गीकरणीयम्। दर्शनसामर्थ्यञ्च तादृशसमर्थोप. देशसाहाय्येनैवार्जयितुं शक्यं, न स्वगवेणामात्रेण। तच्च नित्यनिर्दोषश्रुति. प्रामाण्यस्वीकारेणैव, नान्यथा। परमार्थदर्शने श्रुतेरेव लोचनरूपत्वात्। तद्यथोक्तम्-

अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम्।
सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः॥[6]

परमार्थदर्शनाय संशयोऽप्यावश्यक एव। तथा हि-

न संशयमनारुह्य नरो भद्राणि पश्यति।
संशयं पुनरारुह्य यदि जीवति पश्यति॥[7]

संशयं विना निश्चयार्थिनी प्रवृत्तिरेव न भवितुमर्हति मूढ इव पशुप्रवृत्तिमेवावगाहमानो लोको यथाकथञ्चित् संसरति। यः कश्चिन्मनीषी संशयपूर्वकन्यायप्रयोगैः श्रुत्यर्थं समवधारयन्नग्रेसरति स एवाभ्युदनिःश्रेयस-रूपाणि भद्राणि पश्यति, तमनुवर्तमानोऽन्योऽपि च। किन्तु यः कश्चित्प्रवर्तमानो केवलां संशयात्मिकामेव वृत्तिमभिधत्ते सः स्वलक्ष्यात्पतितोऽधोगतिम्प्राप्नुव-न्नात्महा भवति, अत एवोक्तं ''यदि जीवति'' इति। अत एव भगवता जगद्गुरुणा सम्प्रोक्तम्।

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति।
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः।।[8]

अतः देशकालसापेक्षसामान्यविशेषोभयधर्मविशिष्टवस्तुनः एकान्तदर्शन-मेव परमार्थदर्शनं, तच्च ''एकमेवाद्वितीयमिति'' श्रुत्यनुरोधेन जगज्जन्मस्थितिलय-कारिणि परमेश्वरेऽनन्ते पर्यवस्यतीति शम्।

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।

।। ॐ शान्तिः ! शान्तिः ! शान्तिः।।

सन्दर्भ–

1. सर्वदर्शनसंग्रह, आर्हतदर्शनम्।
2. तत्रैवोद्धृतम्।
3. स्याद्वादमञ्जरी - कारिका 30
4. सर्वदर्शनसंग्रहः, आर्हतदर्शनम्।
5. तत्रैवोद्धृतम्।
6. हितोपदेशः -10
7. तत्रैव, मित्रलाभः, श्लोक-सं.-7
8. श्रीमद्भगवद्गीता - 4.40

साङ्ख्ययोगदर्शने स्याद्वादः

–डॉ. रविशंकरशुक्लः*

ज्ञानं महद् यद्धि महत्सु राजन्,
वेदेषु सांख्येषु तथैव योगे।
यच्चापि दृष्टं विविधं पुराणे,
सांख्यागतं तन्निखिलं नरेन्द्र॥

वैदिकवाङ्मये दर्शनानामतीव महत्त्वं विद्यते। दर्शनेषु जैनदर्शनमपि स्वीयं प्रमुखं स्थानं भजते। तत्र विवेचनीयविषयेषु जैनदर्शने स्याद्वादोराद्धान्तः प्रधानतया स्वीकृतः, परञ्चायं स्याद्वादः ''एकं शास्त्रमन्येन शास्त्रेण प्रवृत्तम्'' इति न्यायेन साङ्ख्योगदर्शनेऽपि प्रच्छन्नतया प्रतिभाति। योगसूत्रेष्वपि ''कृतार्थ प्रति नष्टमाप्यनष्टं तदन्यसाधारणत्वात्'' इत्यत्र प्रधानस्य नष्टानष्ट विचारः उपस्थापितः। साङ्ख्यकारिकायामपि ''रङ्गस्य दर्शयित्वा विनिवर्तते प्रकृतिः'' अत्रापि प्रवृत्ताप्रवृतविषयस्य भानं दृश्यते। सा प्रकृति : रङ्गस्य दर्शयित्वा तस्मान्नृवृतान्निवर्तते विरमति, द्रष्टाहमनेनेति कृतप्रयोजना सती, तथा पुरुषस्यात्मानं संप्रकाश्य देवादिभावरूपं गता निवर्तते प्रकृति मुक्तपुरुषं प्रति नष्टमपि प्रधानं नैव प्रणश्यति यतस्तदन्यः प्रतीयते। पुरुषहेतवे एव दृश्यप्रयोजनमिति। किं तर्हि दृश्यस्य परिणतिराहित्याद् जागतिका सर्वेऽपि दृष्टारो विमुच्यन्त इति? समाधत्ते–ज्ञानोदयेन अविद्याजनिते भ्रमे विनष्टे दृश्यपदार्थाः प्रणश्यन्त्येवेति निश्तिम्, परमियं स्थिति एकस्य मुक्तपुरुषस्य कृत एव वेद्या। परिपूर्णज्ञानरूपाया ऋतम्भरायाः प्रज्ञायाः समुदयो दृश्यस्वरूपप्रकृतिनाशश्च एकस्मिन्नेव जीवपिण्डे जायते।

---

* सहायकाचार्यः सांख्ययोगविभागे, श्री ला.ब.शा.रा.सं. विद्यापीठम्, नवदेहली

असंख्यजीवपिण्डेषु प्रकृतिपुरुषयोरनाद्यसम्बन्धस्तिष्ठत्येव अतो मुक्तिमापन्नस्य द्रष्टुर्दृष्यं विनश्यति, परन्तु द्रष्टृदृश्यसम्बन्धावच्छिन्ना अनन्तजीवा अनादितोऽनन्तकालपर्यन्तं तिष्ठन्त्येव।

कोऽपि पदार्थः स्वरूपत सर्वदा सत् एव तिष्ठति। अनेकान्तवादस्याद्- वादयोर्मते भेदो नास्ति। अयं स्याद्वाद एकांशेन साङ्ख्ययोगदर्शने आभासते इति। अन्यत्रापि ईशकठमुण्डश्वेतांश्वतरोपनिषत्सु राद्धान्ताः इमे संक्षेपेण विवेचिताः सन्ति। स्याद्वादसिद्धान्तस्यः खण्डनं योगसूत्रे कृतवानस्ति पञ्चानामस्तिकायानां पञ्चत्व संख्याऽस्ति नास्ति वेति विचारणे पक्षेऽस्ति पक्षान्तरे नास्ति वेति स्यात्। पक्षे च वक्तव्याः पदार्थाश्चेत्! नाऽवक्तव्या ते भवन्तीति। अवक्तव्याश्चेन्नोच्येरन्! उच्यन्ते चेदवक्तव्या इति प्रतिषिद्धम्। इत्यतस्तथाविधं पूर्वापरविरुद्धं विपरीतञ्च सप्तभङ्गीनयं प्रलपन् वक्ता विभ्रान्त इति सिद्धयति। तस्मान्न तन्मतं तत्त्वज्ञानोपयोगीति[1] तथैव साङ्ख्यकारिकायामपि आह पञ्चानामस्तिकायानां तन्मतं न संगत भवतीति।[2] स्याद्वादस्य सम्बन्धः विचारणीय सराण्या विदुषां मनसि अयं विचारः समुदेति। कोऽयं स्याद्वादः। अस्य स्याद्वादस्य सम्बन्धः सूक्ष्मेक्षिकया मन्ये सांख्यदर्शनस्य सत्कार्यवादेन सहैव घनिष्ठः सम्बन्ध, प्रतिभाति। जैनः किमपि वस्तुजातं इह अस्ति नास्ति, सदसदोः बहु भेदोऽपि नास्ति। स्वसिद्धान्तं सांख्यदर्शनस्य। सिद्धान्तेन सह, कथं समन्वयति। अयं विचार योगदर्शनस्य सांख्यकारिकायाः सत्कार्यवादरूप प्रसंगे निरूपयन्ति। ''जैनास्तु असतः कथञ्चितथायितः पद्गलाख्य परमाणुतः सतोः भावस्योत्पत्तिमङ्गी कुर्वन्ति।

सप्त चैषां पदार्थाः जीवाऽजीवाऽऽस्रवसंवरनिर्जरबन्ध मोक्षा इति। संक्षेपतस्तु द्वावेव-जीवाऽजीवाख्याविति। सप्तानामत्रैवाऽन्तभावात्।। तमिमं प्रपञ्चं प्रकाशन्तरेणापि विवृण्वन्ति, यथा जीवास्तकायः षुद्गलास्तिाकयः, धर्मादऽस्तिकायः अधर्माऽस्तिकायः आकाशाऽस्तिकायश्चेति। तत्र च सर्वत्र सप्तभङ्गी न्यायमवतारयन्ति। यथा स्यादास्त, स्यान्नास्ति स्यादास्ति च नास्ति चाऽक्तव्व्यश्च। तमिमं सप्तभङ्गीनयं ''स्याद्वादइत्यभिदधति। च नास्ति चाऽव्यक्तव्यश्च। स चायं वादोऽपि न युक्तः। यतो हि एकस्मिन्धर्मिणि सदसत्त्वादि। परस्पर विरुद्धधर्मा सामानाधिकरण्यतया स्थातुं योग्याः। यदि

वस्तु स्वभावात्ः स तन्नहि कदाचित्केनाऽपि असदिति कर्तुं शक्यम्, यद्धि वस्तु अस्तिपद विषयं तत सर्वदा सर्वत्र सर्वात्मना स्वरूपेणाऽस्त्येवेति, न तु नास्तीति विषयम् यच्च असन् नास्तीति भवति गगनकुसमादिकं तन्नहि कदाचिदपि सदस्ति' इति भवितुं शक्यम्। तस्मात्परस्पर विरुद्धानां स्यादस्ति स्यान्नास्ति स्यान्नास्ति इति्। वक्यानामुन्मत्तप्रलपितत्वमेवाऽवशिष्यते।

किञ्च–'असतः कथञ्चित्स्थायितः सतः भावस्योत्त्पत्तिमङ्गीकुर्वन्ति। तत्रेदं विचारर्यते—कथञ्चित्स्थायिपरमाण्वादिकारणात् सद्भावो घटादि सत्परुद्यते, सचाऽयं सर्वदा सन्! असन वा! यदि सन् तदा तस्य कारणेनाऽपि सता भवितव्यम् तथा चाऽस्मत्सिद्धान्तसिद्धिः, भवत्सिद्धान्तहानिश्च, यदि चाऽसत्कार्यम् तदास्य सत्वं कर्तुं नाहि केनाऽपिशक्यम् नहि शिल्पिसहस्रेण्ऽप्यसतः खपुष्पस्य सत्वं कर्तुं शक्यते। तथा च घटस्वरूपमेव नोत्पद्येति। तद्युच्येत असत्कारणवाद सन्व घट इत्युत्पस्यते। तदा तु वैनाशिक विजयः। न च भवन्मतेऽपि असत्ः सतः कार्यकारणभावोयुक्तिसहः संभवति। प्रत्युत विरुद्धयोः कार्यकारणभावविरहान्न काऽपि स्वमत सिद्धिः। तस्माद दृश्यमानः स्नेन घटः स्वकारणात् सद्रूपात् प्राविर्भवतीति सिद्धान्तः समञ्जस इति। तथाचायं। सिद्धान्तः सत्तर्कैः स्वतः निरस्तो जातः शास्त्रेषु कश्चन् नियमो भवति। यस्य कस्याऽपि सिद्धान्तस्य खण्डनं क्रियते। तद्विपरीतस्य सिद्धान्तस्य स्वयमेव पुष्टिर्भवतीति सुतरां सिद्धम्।

जैनदर्शने पदार्थनिरूपणावसरे आचार्याः सतपदर्थमङ्गीकुर्वन्ति। तन्मध्ये संवरनिर्जन, वन्ध, मोक्षस्याऽपि चर्चां कुर्वन्ति।

''सकषायत्वाज्जीवः कर्मभावयोग्यान् पुद्गलानादते स बन्धः' चार्वाकाः स्थितिरनुभवः प्रकृतिः प्रदेशश्चेति चत्वारो बन्धाः'' मिथ्यादर्शनाऽविरति प्रमादकष्या बन्धहेतवः, बोधात्मको जीवः अबोध त्मकस्त्वजीव इति। बोधात्मकस्य जीवस्य मिथ्यादर्शन निमित्तो बन्धः प्रथमः इत्येवमादि निरूपयन्ति। तन्न युक्तम्–यतः मिथ्यादर्शनं विपरीतज्ञानम् तन्निमित्तो बन्धश्चेत् तद्यदि नित्यम् तहर्यनिर्मोक्षापत्तिः। नित्यं चेत्! तदा क्षणिकं तत्कृतस्य बन्धस्य चिरस्थायित्वाऽसंभवात् निरन्तर बन्धानुभव विरोधः।

एवं प्रमादानिमित्तो द्वितीयोबन्ध इति। तदपि तदा न युक्तम् प्रमादतोऽनवधानता सा चाऽव्यस्थारूपश्चितधर्म:। तद् विरहदशायामपि बन्धदर्शनेन व्यभिचारान्न तस्य वन्धहेतुत्वम् कषाया: क्रोधादयश्चित्तधर्मास्तन्नि-मित्तस्तृतीय वन्ध इति। तदपि न चित्तकषायानामनेकेषा नाम बन्धहेतुत्वाऽपेक्षया लाघवादेकस्यैव तद्धर्मभूत दु:खस्यबन्ध तद्धेतुत्कल्पनाया लाघवादिति। सर्वं चतुरस्रम्।

उपसंहार:

पातञ्जलयोग सूत्रव्याख्यानवसरे तथाच कारिकाया:– सत्कार्यवादस्य प्रसंगे यत्साम्यं उभयो दर्शनयो: परिलक्षितं भवति। तेनेदमवगम्यते 'एकं शास्त्रमन्यत् शास्त्रेषु प्रविष्टमिति। क्ववचित् साम्यं क्वचिच्च वैमत्यं भवत्येव दर्शनानां समेषां समीक्षणदृष्ट्या यथैकं सद्विप्रा बहुधा वदन्ति, इति न्यायेन सर्वाणि दर्शनानि आस्तिकानि, नास्तिकानि च स्व सिद्धान्त प्रस्फोटनकाले स्वमतस्थापनाय च किञ्चिदेव, विरुद्धावभासं सर्वत्र भवति।

सांख्ययोगदर्शने समेषां दर्शनानां सिद्धान्तानाञ्च निष्पक्षतया उदयभावनं उपस्थापनं करोति, यत्र यत्र अवैदिकमतं सङ्गच्छते। तनिरस्य सिद्धान्तस्थापनमेव करोति।

अयं स्याद्वाद: सत्यकार्यवादान्तगर्तत्वात् परिलक्षितो भवति। इति शम्।

सन्दर्भ

1. योगसूत्र 2/22
2. साङ्ख्यकारिका 59
3. योगसूत्र 2/4
4. साङ्ख्यकारिका 8

स्याद्वादस्य श्रीशाङ्करभाष्यदिशा समीक्षणम्

–डॉ. प्रभाकरप्रसादः*

अनादिनिधनं ब्रह्म स्वतन्त्रं निरुपाधिकम्।
पूर्णं तत्त्वं सदा नौमि मायामोहविवर्जितम्॥

वेदान्तवाक्यानामैदंपर्यनिरूपणमुखेन मुमुक्षूणां मोक्षसाधनत्वेन सम्यग्दर्शन-बोधनार्थं प्रवृत्तं शारीरकमीमांसाशास्त्रम्। अस्य च शास्त्रस्य द्वितीयोऽध्यायः विरोधपरिहाराध्यायः, अत्र च साङ्ख्यपक्षस्य नैयायिकानां बौद्धानाञ्च पक्षस्य निराकरणं कृतम् एवं जैनमतस्यापि निराकरणं कृतम्। अत्र च ''न निन्दा निन्द्यं निन्दितुं प्रवर्तत अपि त विधेयं स्तोतुम् इति निन्दान्यायेनैवाचार्याणां प्रवृत्तिः। अतः जैनमतस्य खण्डने आचार्याणां प्रवृत्तिर्नास्त्यपि तु स्वपक्षस्थापने तत्रैव लोकानां प्रवर्तन एव। अत्र व्याससूत्रम् ''नैकस्मिन्नसम्भवात्'' इति एकस्मिन् धर्मिणि विरुद्धधर्मयोः समावेशस्यासम्भवादिति सूत्रार्थः। जैनदर्शने चैकस्मिन्नेव धर्मिणि विरुद्धधर्मयोः समावेशः स्वीक्रियते एव। वस्तुनः अनेकान्तत्वमभ्युपगम्य हि स्याद्वादः जैनाचार्यैं प्रवर्तितः। यथा साङ्ख्यनये कार्यमुत्पत्तेः प्रागपि सद् इति सत्कार्यवादमाश्रित्य अभिव्यक्तिवादेन परिणामवादेनोत्पत्तिव्यवहारो निरूप्यते यथा वा नैयायिकाः कार्यमुत्पत्तेः प्रागसदिति असत्कार्यवादमाश्रित्यारम्भवादेनावयविनामुत्पत्तिं वर्णयन्ति तथैव जैनाचार्या वस्त्वनेकात्मकमिति निर्धारितरूपमेवाश्रित्य सप्तभङ्गीनयं नाम न्यायमवतारयन्ति। इदञ्च यथार्थम्। आचार्यामृतचन्द्रैरुक्तम् ''अनेकान्तात्मक-कार्थकथनं स्याद्वादः। इति स्याद्वादो हि समस्तवस्तुतत्त्वसाधकमेकमस्खलितं शासनमर्हत्सर्वज्ञस्य, स तु सर्वमनेत्येकान्तात्मकमित्यनुशास्ति। तत्र यदेवं सत्तदेवासत् यदेवैकं तदेवानेकं यदेवानित्यं तदेव नित्यमित्येक-वस्तुवस्तुत्वनिष्पादकपरस्परविरुद्धशक्तिद्वयप्रकाशनम्अनेकान्त इति च। एवञ्च

* सहायकाचार्यः सर्वदर्शनविभागे, श्री ला.ब.शा.रा.सं. विद्यापीठम्, नवदेहली

स्याद्वादःसंशयवादो नास्ति अपि तु घटः अस्ति इति कथने घटः सत्तावान् इति बोधे घटे त्रैकालिकसत्तायाः बोधः स्यान्न कदापि सत्ताभाववानतः एवं निरूपाधिकसत्तावत्त्वबोधकमस्तिपदं देशान्तरेऽपि सत्त्वस्य बोधकं स्यादतः घटः स्यादस्तीति वक्तव्यमिति स्याद्वादस्याशयः वस्तुनिष्ठधर्माणां सापेक्षत्वबोधकोऽयं स्यादवादः। गुणगुणिनोः भेदाभेदवादिनां मतेऽपि एकत्रैव भेदः स्वीकृतः एकान्तेनेति, वक्तुं न शक्यते न वैकान्तेन तयोरभेद इति अतः अर्थात् अनेकान्तवादः स्वीकृतो भवति। कारणात्मना जगत् सत्यम् कार्यत्मना मिथ्येति वादिनां मतेऽपि कथञ्चिदनेकान्तवादः सिद्ध्यत्येव। परिणामवादिनां मते नित्यत्वमनित्यत्वञ्चैकत्रोपाधिभेदेन भवतीति कथञ्चिदनेकान्तवादः स्वीकार्य एव। व्यधिकरणधर्मावच्छिन्नप्रतियोगिता-काभववादिनां मतेऽपि घटत्वेन पटो नास्ति पटत्वेनास्तीति कथञ्चित् स्याद्वाद उक्तप्राय एव भवति। स्याद्वादस्यायमाशयः श्रीभगवत्पादाचार्यैर्ज्ञात एव तथा हि भाष्यम् -''नन्वनेकात्मकं वस्त्विति निर्धारितरूपमेव ज्ञानमुत्पद्यमानं संशयवन्नाप्रमाणं भवितुमर्हतीति''[2]इति शङ्काग्रन्थेन स्पष्टं प्रतीयते भगवत्पादैः संशयरूपत्वं स्याद्वादस्य नाङ्गीकृतमिति।

स्याद्वादे स्यात्शब्दः तिङन्तप्रतिरूपको निपात इति भाष्यकारैः ज्ञातमेव स्यादिति टीकाग्रन्थेन स्पष्टं बोध्यते वाक्येष्वनेकान्तद्योती गम्यं प्रति विशेषणम्। स्यान्निपातोऽर्थयोगित्वात् तिङन्तप्रतिरूपकः। इति जैनाचार्याणां ग्रन्थ उद्धृतो दृश्यते। एवञ्चेदं स्याद्वादविषये तत्त्वं भगवत्पादैः तन्निबन्ध-कारैश्च ज्ञातमेवेति भाष्यकाराणामिदमज्ञातमित्याक्षेपः अतिसाहसमेव। अस्य निराकरणमेवं कृतम् निरङ्कुशं ह्यनेकान्तत्वं सर्ववस्तुषु प्रतिजानानस्य निर्धारणस्यापि वस्तुत्वाविशेषादस्य स्याद्वाद्स्य प्रसक्तेः सम्भवादर्थतः निर्धारणमप्यनिर्धारणात्मकं स्याद्। निराकरणस्यायमाशयः— परमार्थतः स्याद्वादो नास्तीति तेषामप्याशयः, वस्तुनः सापेक्षत्वं धर्मेषु अस्तीति प्रतिपादनार्थमयंवादः अपेक्षितः आत्मा, ज्ञानं दर्शनादिगुणेषु स्याद्वादो नास्ति, अनेकान्तस्याप्य-नेकान्तत्वमस्तीति। वेदान्तसिद्धान्ते तु यदस्ति सत्यं तत् सर्वदा सर्वत्र सर्वथाऽस्त्येव यथा ब्रह्म, यन्नास्ति तत् क्वचित् कथञ्चित् कदाचित्केनात्मनापि नास्त्येव, 'नासतो विद्यते भावो नाभावो विद्यते सतः इति गीतोक्तेः, यच्च यन्नास्ति तदपि क्वचिद् अस्तीति यद्व्यवह्रयते तद्व्यवहारार्थमेव न तु

परमार्थतः। व्यवहारार्थं पारमार्थिकमस्तित्वं नापेक्षते काल्पनिकास्तित्वारोपेणापि वयवहारः उपपद्यते। ''प्रमाणादिसत्त्वाभ्यु- पगमौदासीन्येन व्यवहारनियमेन समयं बद्धवा प्रवर्तितायां कथायामित्यादिना ''श्रीहर्षमिश्रैः संव्यवहारार्थं पारमार्थिकास्तित्वबोधनं नापेक्षते इत्युक्तम्।

''एवं त्रिचतुरज्ञानजन्मनो नाधिकामतिः'' इति न्यायेन वादिप्रतिवादिभिः कोटिद्वयं कोटिचतुष्टयं वा पर्यन्तं वादेन यन्निर्णीतं तत्तावदर्थात् बाधावागमपर्यन्तं प्रामाणिकमिति मत्वा व्यवहार उपपद्यते। अत एवानधिगताबाधितविषयज्ञानत्वं प्रमात्वं स्वीकृतम् ''तस्माद् बोधात्मकत्वेन प्राप्ता बुद्धेः प्रमाणता'' इति स्वतः प्रामाण्यवादिभिः भ्रमात्मिकाया बुद्धेरपि बाधपर्यन्तं प्रामाण्यं स्वीक्रियत एव। निष्कम्पप्रवृत्तिं प्रति अत्रेदमस्तीति ज्ञानं पर्याप्तम् तेन च प्रत्ययेन वस्तुन अबाध्यतं न सिद्ध्यति। अतः व्यवहारः इदानीमत्रेदमस्तीति बुद्ध्यैव भवितुमर्हति, तदर्थं तत्प्रकारान्तरेणासदपि इत्यादिविषयतत्त्व बोधनं नापेक्षते। एतेनेदमपास्तम् कम्बलं कथमस्तीति प्रश्ने मृदु इति उत्तरं भवति, यद्यपि तत् कृष्णादिवर्णयुतमपि अस्ति, तेनेदं ज्ञायते वस्तुनो याथार्थ्यबोधनं कम्बलं मृदु इति बोधने न सिद्ध्यतीति तत्रोच्यते तस्य वस्तुनः याथार्थ्यबोधस्य अपेक्षा नास्त्येव, सामान्यत तस्यास्तित्वबोधनेनैव सिद्ध्यति अतः तदर्थं वस्तुनो धर्मान्तरवत्वप्रतिपादनं नापेक्षत एव अतः सापेक्षत्वबोधकं स्यात्पदं नापेक्षितमेव। एवञ्च स्याद्वादानङ्गीकारेणापि व्यवहारः सिद्ध्यति।

किञ्च स्याद्वादिभिः चेतनाचेतनयोरर्थात् आत्मा स्यात् चेतनः इत्यत्र वास्तविकविरोधस्य सत्वात् नाङ्गीक्रियते। नित्यात्वानित्यत्वयोस्तु विवक्षाभेदेन सम्भवादेकत्र स्याद्वादः स्वीक्रियते। तत्र विरोधो द्विविधः वध्यघातकभावः सहानवस्थानरूपश्च चेतनत्वाचेतनत्वयोः नित्यत्वानित्यत्वयोरपि समानः इति कथं भेदः व्यवस्थाप्यत इति स्याद्वादः सर्वत्रानुसरणीय इति नियमो नापेक्षते इत्येव निराकरणस्याशय उपाधिभेदेनैकत्र विरुद्धधर्माणां समावेशः स्वीक्रियत एव। अतः सर्वत्रेमं सप्तभङ्गीनयं नाम न्यायमवतारयन्ति जैनाः तन्नापेक्षते इत्येवाचार्याणां मतं प्रतीयते।।

सिद्धान्तरीतिषु मया भ्रमदूषितेन स्यादन्यथापि लिखितं यदि किञ्चिदत्र संशोधने सहृदया सदया भवन्तु सच्छास्त्रतत्त्वपरिशीलननिविशंका।।

सन्दर्भ

1. एतच्च श्रीशङ्करभगवत्पादानां भाष्यादेवावगम्यते– यद्यपीदं वेदान्तवाक्यानामैदम्पर्य-निरूपयितुं शास्त्रं प्रवृत्तं न तर्कशास्त्रवत् केवलाभिर्युक्तिभि: कञ्चित्सिद्धान्तं साधयितुं दूषयितुं वा प्रवृत्तम्, तथापि वेदान्तवाक्यानि व्याचक्षाणै: सम्यग्दर्शनप्रतिपक्षभूतानि साङ्ख्यादिदर्शनानि निराकरणीयानीति तदर्थ: पर: पाद: प्रवर्तते इति।
2. कल्पतरुग्रन्थाद् उद्धृतम् (ब्र. सू. भामतीकल्पतरु 2.2.6)
3. ब्र. सू. शाङ्करभाष्यम् 2.2.6,
4. खण्डनखण्ड- खाद्याद् उद्धृतम् (खण्डनखण्डखाद्यम्),
5. खण्डनखण्डखाद्याद् उद्धृतम् (खण्डनखण्डखाद्यम्)।

भवबीजाङ्कुरजनना रागाद्याः क्षयमुपगताः यस्य।
ब्रह्मा वा विष्णुर्वा हरो जिनो वा नमस्तस्मै॥

जिसने संसार के कारणभूत रागादि को क्षय कर दिया है उसे ही नमस्कार हो; चाहे वह ब्रह्मा हो, विष्णु हो, हर हो या जिन हो।

–आचार्य हेमचन्द्रसूरि

समन्वयवादः स्याद्वादः

–डॉ. जवाहरलालः*

भारतीयदार्शनिकजगति जैनदर्शनं सविशेषं राजते। सर्वेषां दर्शनानां विरोधं परिस्कृत्य तेषां एकस्मिन्नेव सूत्रे ग्रथनार्थमेवास्य दर्शनस्य वैशिष्ट्यं भजते। यद्यपि आगमिकदृष्ट्या इदं दर्शनमनादिः परम् आदितीर्थङ्करः भगवान् ऋषभदेवः अस्य दर्शनस्य प्रवर्तकः इति जैनपरम्परानुयायिनः स्वीकुर्वन्ति। तथापि कतिपयानां इतिहासज्ञानां मते अस्य दर्शनास्योद्भवः इतः 2500 वर्ष प्राक् ई. पू. पञ्चमं शताब्द्यामभवत्। भगवान्महावीरः वर्तते अस्य दर्शनस्य आद्युपदेष्टा। अथ इन्द्रभूति–सुधर्माचार्य–भद्रबाहु–आचार्यकुन्दकुन्द–उमास्वामि–सिद्धसेनदिवाकरादयः विद्वांसः स्वीकुर्वन्ति यत् ततोऽपि 250 वर्षं प्राक् भगवान्पार्श्वनाथः अस्य दर्शनस्य प्रवर्तनमकरोत्। जैनपरम्परायां चतुर्विंशतितीर्थंकराः अभूवन्, तेष्वाद्य तीर्थङ्करः ऋषभदेवः अन्तिमश्च गौतमबुद्ध–समकालीनः भगवान् महावीरः वर्तते। सामान्यतया विष्णुं देवतां मन्यमानाः वैष्णवः, शिवं शैवः, शक्तिं शाक्तमुच्यते। एवमेव जिनं देवतां मन्यमानाः जैनाः उच्यते। तैः स्वीकृतं दर्शनं जैनदर्शनमिति सिद्ध्यति। परन्तु जैनसाहित्ये जैनधर्मदर्शनस्य जैनशब्दस्य एकः विशिष्टः अर्थः वर्तते, अत्र जिन शब्दस्य अर्थः वर्तते जयमानः जितेन्द्रियः इत्यर्थः। जयति काम–क्रोध– राग–द्वेषादि सर्वाणि विकाराणि (दोषान्) इति जिनः। जिनादागतः, जिने भावो वा जैनः। जैनानामभिमतं दर्शनं जैनदर्शनम्। जिनानामुपदिष्टं दर्शनमित्यर्थः। जिनाः स्वभावसिद्धाः जन्मसिद्धाः न भवन्ति, अपितु जन्मान्तरक्रोधादिकषायाणामुपरिविजयं प्राप्तवन्त एव ते वीतरागिणः, सर्वज्ञाः भवन्ति।

---

* सहायकाचार्यः सर्वदर्शनविभागे, श्री ला.ब.शा.रा.सं.विद्यापीठम्, नई दिल्ली

अस्य दर्शनस्य प्रमुखतमः सिद्धान्तः वर्तते स्याद्वादः। अनेन सिद्धान्तेन ज्ञानानां सापेक्षता द्योत्यते। जैनदर्शनं जैनेतरदर्शनसिद्धान्त-दृष्ट्याऽवलोक्यते चेत् जैनसिद्धान्ते संदेहाभासो जायते, किन्तु जैनदर्शनदृष्ट्या स्याद्वादसिद्धान्ते लेशमात्रोऽपि सन्देहावकाशो न वर्तते। वस्तुतः अयं स्याद्वादसिद्धान्तः सर्वेष्वेव इतरभारतीयदर्शनेषु समन्वयं स्थापयति। इतराणि यान्यपि भारतीयदर्शनानि तानि सर्वाणि एकैकं पक्षमधिकृत्यैव प्रवृत्तानि। स्याद्वादस्तु सर्वेष्वेव पक्षेषु समन्वयं स्थापयति। अत्र जैनदर्शने शब्दस्य प्रयोगः विशेषार्थे (विशिष्टार्थे) विहितोऽस्ति। अयं तु पारिभाषिकः, शब्दः। अनेन ज्ञानस्य सापेक्षता सूच्यते। अतः स्यात् शब्दस्यार्थः सापेक्षता' इति शब्देन परिभाषयितुमुचितं प्रतिभाति। मनुष्येषु यत् किमपि ज्ञानं भवति न केवलमांशिकमपितु सापेक्षं भवति। सापेक्षत्वाच्चास्य सत्यत्वं सूचनाय जैनाचार्याः प्रत्येकं परामर्शात् पूर्वं स्यात् पदं योजयन्ति। अनेन स्यात् पदेन न केवलं वाक्यानां सत्यत्वं सिद्ध्यति अपितु एकैक (एकान्त) पक्ष प्रतिपादकेषु दर्शनेषु समन्वयोऽपि भवति। स्यात् पदस्य तात्पर्यं प्रकाशयता सर्वदर्शनसंग्रहकारेण माधवाचार्येण लिखितं यत्–

स्याच्छब्दः खल्वयं निपातस्तिङन्तप्रतिरूपकोऽनेकान्तद्योतकः॥
यथोक्तं– ''वाक्येष्वनेकान्तद्योतीगम्यंप्रतिविशेषणम्'॥
स्यान्निपातोऽर्थयोगित्वातिङन्तप्रतिरूपकः॥

यदि पुनः एकान्तद्योतकोऽयं स्याच्छब्दः स्यात्तदा स्यादस्तीति वाक्ये स्यात्पदमनर्थकं स्यात्। पदात्कथञ्चिदयमर्थो लभ्यते इति नानर्थक्यम्। अत आह–

स्याद्वादः सर्वथैकान्तत्यागात् किंवृत्तचिद्विधेः।
सप्तभङ्गी नयापेक्षो हेयादेयविशेषकृत्॥[1]

अतः संक्षेपेण सप्तभङ्गीनयः कथ्यते–

1. **स्यादस्ति**–कस्यचिदपेक्षया वस्त्वस्ति, यथा स्याद् घटोऽस्ति इत्यत्र स्यात् पदेन घटस्य देश-काल-द्रव्यापेक्षया सत्तां सूचयति। किञ्चित्कालविशिष्टे किञ्चिद्देशविशिष्टे घटः अस्ति इति। सत्कार्यवादिनः सांख्याः पदार्थानां सदैव सत्तामेव स्वीकुर्वन्ति।

2. **स्यान्नास्ति–** कस्यचिदपेक्षया वस्तु नास्ति, यथा अत्र स्याद् घटो नास्ति अस्य तात्पर्यं इदं नास्ति यद् घटः नास्त्येव। अपितु किञ्चित् काल-देश-द्रव्य-भावापेक्षया द्रव्यं नास्ति इत्यर्थः। शून्यवादिनः बौद्धाः तत्त्वानां सदैव असदेव स्वीकुर्वन्ति।

3. **स्यादस्ति च नास्ति च–**कस्यचिदपेक्षया वस्त्वस्ति च नास्ति च यथा अत्र स्याद् घटः अस्ति च नास्ति च। अनेन द्रव्य-काल-भावापेक्षया घटस्यास्तित्वनास्तित्त्वमपि सिद्ध्यति। असत्कार्यवादसमर्थकैः नैयायिकैः उत्पत्तेः प्राक् पदार्थस्याभावः उत्पत्तौ सत्त्यां भावः नाशे च सति पुनः अभावश्च मन्यते।

4. **स्यादवक्तव्यं–** सापेक्षतया वस्त्ववक्तव्यमिस्ति यथा अत्र स्याद् घटः अवक्तव्यं, अर्थाद् घटः द्रव्य क्षेत्रकालभावमर्यादया कथंचिदस्ति, कथंचिद् नास्त्यपि। घटस्य अस्तित्वानास्तित्त्वयोः युगपत् निर्वचनासंभवात् घटः अवक्तव्यम्। अद्वैतवेदान्तिनः मायायाः अनिर्वचनीयत्वं स्वीकुर्वन्ति। मायोत्पन्नस्य वस्तुनः अस्तित्वं प्रतीतिकालेऽपि न भवति सत्त्वावस्थायामपि असदेव अतः परस्पर विरुद्धसत्त्वासत्त्वयोः निर्वचनासंभवः अतः अनिर्वचनीयः। सप्तभङ्गिनयेषु चत्वारः एव मुख्याः, शेषास्त्रयः चतुर्णामेव मिश्रणेन समुत्पद्यन्ते।

5. **स्यादस्ति च अवक्तव्यञ्च** (सापेक्षतया वस्त्ववक्तव्यञ्चास्ति)

6. **स्यान्नास्ति चावक्तव्यञ्चास्ति** (सापेक्षतया वस्तु नास्त्यवक्त-व्यञ्चास्ति)

7. **स्यादस्ति च नास्ति चावक्तव्यञ्च** (सापेक्षतया वस्त्वस्ति नास्त्यवक्तव्यञ्चास्ति) इति।

जैनन्यायशास्त्रे परामर्शः एतेषु सप्त वाक्येष्वेव भवति। अयमेव सप्तभंगीन्यायः (नयः) उच्यते। अत्र भंग शब्दः समुच्चयार्थकः वर्तते। अर्थाद् यत्र अस्तित्वनास्तित्वयोः उभयोः युगपत् समुच्चयः भवति स सप्तभंगीनयः। सांख्यादिदर्शनेषु दार्शनिकैः प्रतिपादितानां एकान्तवादानां अत्र समन्वयः दृश्यते। जैनदर्शनानुसारेण कस्यचिद् वस्तुनः एकस्मिन्नैव

काले सामान्य मनुष्येण ज्ञानमसंभवः। अतएव दार्शनिकेषु सन्ति विप्रतिपत्तयः। अन्येषां परम्परायां तत्त्वानामवलोकनं एकैकेनैव पक्षेण क्रियते अत एव तेषां ज्ञानमपि एकांगी भवति जैनमते तत्त्वानामध्ययनं सापेक्षदृष्ट्या भवति अतः तेषां ज्ञानमपि सापेक्षात्मकं भवति, इदं सापेक्षत्मकं ज्ञानमेव नयः। यथा **''एकदेशविशिष्टोऽर्थो नयस्य विषयो मतः''**। 4 अत एव सर्वमपि ज्ञानं ज्ञातुः बोधापेक्षया वस्तुनः सत्तापेक्षया वा प्रामाणिकं भवन्ति। सर्वतो भावेन न किमपि ज्ञानं सत्यं नाप्यसत्यं वा भवति। अत्र एव जैनः भवतु अन्ये वा भवतु स्वाभिमतमेव पूर्ण सत्यं स्वीकृत्य परमतं दूषयति, तर्हि तस्य ज्ञानं स्याद्वादः तावदेव निराकरोति यावत् गजस्य तत्तदंगस्पर्शनेन तमङ्गमेव गजस्येति मन्यमानं प्रज्ञाचक्षुणामभिप्रायं निराकृतो भवति।

जमणेगधम्मणो वत्थुणो, तदंसे च सव्वपडिवत्ती।
अंधत्व गयावयवे तो, मिच्छादिट्ठिणो वीसु॥[2]

एतद् विपरीतं यथा गजस्य समस्तअवयवजमितिसमुदायं गजमिति मन्यमानानां मतं सम्यक् भवति तथैव सकलनयानां, पर्यायानां, धर्माणां वा स्वरूपं ज्ञातृणां मतं सम्यक् भवतीति तेषामभिप्रायः।

जं पुण समतपज्जायवत्थुगमगत्तिसमुदिया तेणं।
सम्मत्त चक्खुमओ सव्वगयावयवगहणे व्व॥[3]

लोकेऽपि कस्यचिदपि कार्यस्योत्पत्तौ पञ्चहेतवः स्वीक्रियन्ते, कालः स्वभावः, नियतिः, दैवः, पुरुषार्थश्च। एतत् पञ्चसम्मिल्य सम्यक् कार्यसम्पादकाः भवन्ति। यथा मुक्ताः पृथक् पृथक् सत्त्वे अतिमल्यवान् सत्त्वेपि व्यवहारायोग्याः भवन्ति तथैव नयाः अपि पृथक् पृथक् सत्त्वे लोककल्याणाय न भवन्ति। एतद् विपरीतं एकस्मिन् सूत्रे अनुस्यूते सति मुक्ताहारः भवति तथैव एकान्तस्वरूपाणां तत्तद् नयानां समवाये सति ते प्रमाणभूताः भवन्ति।

यथा विशकलितानां मुक्तामणीनामेकसूत्रानुस्यूतानां
हार व्यपदेशः एवंपृथगभिसंबन्धिनां नयानां स्यात्
वादलक्षणैकसूत्रप्रोतानां श्रुताख्यप्रमाणव्यपदेश इति॥[4]

अत एव जैनदार्शनिकाः तत्तत् सर्वान् दार्शनिकविचारान् सापेक्ष्यं स्वीकृत्य तेषु समन्वयं स्थापयन्ति। एतदर्थमेव सापेक्षसूचनाय ''स्यात्'' शब्दस्य परामर्शः सर्वत्रैव कुर्वन्ति। स्यादस्ति घटः इत्युक्ते तात्पर्यमिदमेव यद् एकेन पक्षेण देशतः कालतः, पात्रतः द्रव्यतः, भावतश्च विमृश्यते चेत् तर्हि घटो अस्ति, परं अन्यस्य नास्तित्वादेः पक्षस्यापि संभावना तु अस्त्येव। अयमेव स्याद्वादः।

अत्र जैनदर्शनप्रतिपादितानां जीवादिसप्ततत्त्वानां स्वरूपं यादृशं जटिलं गभीरञ्च वर्तते, तेषां एकान्ते विवेचनमसंभवः। किमर्थं? तर्हि उच्यते–

''तत्त्वं न सद् वक्तुं शक्यते, नाप्यसत्''।।[5]

सत् सत्त्वे इति कस्यचिदपेक्षया असदस्ति, असद् सत्त्वेऽपि कस्यचिदपेक्षया सदस्ति। यथा गीतायामपि उक्तं–

अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते।।[7] गीता 13.12

अपि च–

अविभक्तं च भूतेषु विभक्तमिव चस्थितम्।।[8]

अर्थाद् अविभक्तेऽपि विभक्तवत् प्रतिभाति इति।

एकान्तप्रतिपादकान्येतरन्याय-वेदान्तादीनि दर्शनानि अनेकान्तमत-माश्रित्यैव स्वमतमेकान्तं प्रतिपादयन्ति। यथा नैयायिकाः आत्मनः स्वरूपं जीवापेक्षया अणुत्वं प्रतिपादयन्ति परमात्मापेक्षया विभुत्वमेव। एवं वेदान्तिनोऽपि ब्रह्मणः कस्यचिदपेक्षया सगुणत्वं कस्यचिदपेक्षया च निर्गुणत्वं प्रतिपादयन्ति। अथ च विशुद्ध चैतन्यं ब्रह्म अद्वितीयमस्ति, तर्हि उच्चावचं प्रपञ्चं कथं प्रतिभासयति। इत्यत्र स्वयं आचार्यशंकरः श्रुत्या, युक्त्या अनुभवाधारेण च बीजभूतपरमात्मशक्तेः सद्भावं स्वीकृतवान्। यया व्यपाश्रया अद्वयब्रह्म अस्य नामरूपात्मकस्य प्रपंचस्य कारणतां निर्वहति। मुण्डकोपनिषद्भाष्ये स्वयं आचार्यः वदति–

अविद्यया संवृत्तं सन्नलक्ष्यते तत्रस्थमेवाविद्वद्भिः।।[9]

ब्रह्मसूत्रभाष्ये पुनः आचार्य शंकरः अपर ब्रह्मोपासकानामपेक्षया देशपरिच्छेदयुक्तफलं, परब्रह्मोपासकानामपेक्षया देशपरिच्छेदराहित्यफलं विहितवान्।

नहि परब्रह्मविद्देशपरिच्छिन्नं फलमश्नुतेति युक्तं सर्वगतत्वात्परस्य ब्रह्मणः।।[11]

अग्रे पुनः–पिण्डापेक्षया प्राणस्य परत्वोपपत्ते इति।

अनेकान्तं विना मायायाः अनिर्वचनीयत्वं प्रतिपादनमपि असंभवमेव।

एवमेव बौद्धदार्शनिकाः अपि अनेकान्तमाश्रित्यैव शून्यवादं व्यवस्थापयन्ति। यथोक्तं अद्वयवज्रसंग्रहे–

न सन्न चासत् न सदसन्नचाप्युभयात्मकम्।
चतुष्कोटिविनिर्मुक्तं तत्त्वं माध्यमिकाः विदुः।।[12]

अत्र यद्यपि सर्वत्र दर्शनशास्त्रेषु अस्याः पद्धतेः आश्रयणं तु अस्त्येव, तथापि सांगोपांगसिद्धान्तरूपेण विवेचनं तु जैनदर्शने एव वर्तते, अतः अस्य दर्शनस्य इदं वैशिष्ट्यं।

एकान्तेन जीवादितत्त्वानां सम्यग् विवेचनं अद्यावधिपर्यन्तं न जातं नैव च भविष्यति, तत्त्वानामनन्तधर्मात्मकत्वादिति। अतः एकया दृष्ट्या कस्यचिदपि वस्तुनः सम्यग्ज्ञानं नैव संभवः। अत एव उक्तं तिलोयपण्णत्तौ–

णओ विणादुस्स हिदयभावत्थो।।[13]

कस्याश्चिद् नर्तकेः मृतशरीरवलोकने साधोः भिन्ना दृष्टिः भवति, व्यभिचारिणः भिन्ना, श्वानस्य च भिन्ना। ययाऽपि दृष्ट्या तमवलोकयति तं तथैव दृश्यते यथा तेषां हृदये भावः भवति। अतः यत् किमपि विवक्षितं तत्त्वं विद्यते तत्र व्यक्तेः यादृशी दृष्टिः पथि आयाति तत् तमेव स्वरूपं सत्यं भवति नान्यदिति।

णियवयणिज्जसच्चा, सव्य नया पर वियालणेमोहा।।[14]

अनेन सिद्ध्यति यत् अतीतानागतवर्तमाने द्रष्ट्रादृष्टस्य सत्यस्य

यत् स्वरूपं निर्णेष्यते वा तन्न सर्वथा सत्य नाप्यसत्यम्। समदृष्टियुक्तानां कृते सत्यं भिन्नं अन्येषां च कृते असत्यम्, इदमेव तथ्यम्। अथ च जैनदर्शनस्य स्याद्‌वादसिद्धान्तः प्राणः। जैनपरम्परानुयायिनः भवतु न वा भवतु, स्याद्वादानुयायिनः भवतु न वा भवतु, दर्शनेन निर्णीतं तथ्यं नैव पूर्णं सत्यं भवति, नैव च पूर्णमसत्यम्। कथञ्चित् सत्यं भवति कथञ्चिदसत्यम्। उभयपक्षावलोकनपरायणः कश्चितृतीयः तत्रैव सापेक्षबुद्‌ध्या युगपत् सत्यमसत्यं पश्यति। अन्यः कश्चिच्चतुर्थः पश्यति केवलं न श्रृणोति न विचारयति तत् कृते तदेव सत्यासत्यविकल्पातीतं अनिर्वचनीयम्। अयमेव सप्तभंगी सिद्धान्तः। यथोक्तं-

सिय अत्थि णत्थि उहयं अव्वत्तव्वं पुणो य तत्तिदयं।

दव्वं खु सत्तभंगं आदेसवसेण संभवदि॥[15]

अत्र स्याच्छाब्दः नास्ति संशयवाचकः, अपितु अयं निपातः, जैनदर्शनस्य पारिभाषिकः शब्दः कथञ्चित्तत्त्वद्योतकः। अर्थात् अनया दृष्ट्या वस्तुनः इदं स्वरूपं, अनया दृष्ट्या इदमिति स्यात् पदं नियोज्य वचनमित्येव स्याद्वादः।

जैनदर्शनानुसारेण त्रिलक्षणसम्पन्नं द्रव्यम् उत्पादं व्ययं ध्रौव्यञ्चेति। यथा सूत्रकारेण उमास्वामिना भणितं–

उत्पाद्व्ययध्रौव्ययुक्तं सत्॥ सत् द्रव्यलक्षणमिति॥[16]

अर्थात् लक्षणत्रययुक्तत्वं द्रव्यस्य सामान्य लक्षणम्। लक्षणमिदं वस्तुनः अनन्तधर्मावबोधकं भवति। प्रत्येकस्मिन् द्रव्ये उत्पत्तिः विनाशः स्थितिश्च भवति, तत्र गुणे ध्रौव्यं, पर्याये स्थितिः विनाशश्च (परिवर्तनं) भवति। अत एव द्रव्यं गुणपर्यायात्मकमुक्तं तच्च द्रव्यं नित्यमपि भवति अनित्यमपि भवति। गुणरूपेण नित्यं, पर्यायरूपेण च अनित्यम्। यथा मृत्तिकया घट निर्माणं भवति, तत्र मृत्तिकायाः पिण्डपर्याय नाशे सति घटपर्यायोत्पत्तिर्जायते, परन्तु मृत्तिका तु वर्तते एव। अतः मृत्तिका अपेक्षया द्रव्यं सत्। एकस्य नाशाद् अपरस्य पर्यायस्य आविर्भावात्। आकृति-परिवर्त्तितेऽपिद्रव्यं तु अपरिवर्त्तितमेव। अतः उत्पाद्-व्यय-ध्रौव्यञ्च त्रिलक्षण-

सम्पन्नं द्रव्यं भवतीति अनेकान्तदृशा एव साधयितुं शक्यते।

जैनेतरभारतीयदार्शनिकै एकान्तदृष्ट्या विचार्यते, अतएव तेषां मते अयं समन्वयात्मकवादः स्याद्वादः संशयवाद इति प्रतिभाति। परं नायं संशयवादः अपितु सापेक्षवादः। जैन दार्शनिकैरेतत् न कदापि भाषितं यद् वस्तुषु परस्परविरुद्धधर्म एकयैव दृष्ट्या एकस्मिन्नेवार्थे भवन्तीति। इदं विज्ञेयमस्ति यत् प्रत्येकं वस्तु अनेकधर्मात्मकं भवति तत्र परस्परविरुद्धधर्मा अपि राजन्ते। यतो हि वस्तुनामयं स्वभावः। यथा- द्रव्यदृष्ट्या वस्तुषु एकता नित्यता, पर्यायदृष्ट्या चानेकतानित्यतादीनां सापेक्षतया विधानं क्रियते स्याद्वाद् सिद्धान्ते। स्व द्रव्य-रूप-देश-कालदृष्ट्या वस्तुनः सत्तायाः तथा च परद्रव्यरूपदेशकालदृष्ट्या वस्तुनोऽसत्तायाः सापेक्षतया विधानं क्रियते। अतः स्याद्वादस्य समन्वयात्मकः दृष्टिः, नास्ति विरोधस्यावकाशः।

संदर्भ

1. सर्वदर्शनसंग्रहः, आर्हतप्रकरणम्
2. विशेषावश्यकभाष्यम् 2269
3. विशेषावश्यकभाष्यम् 2270
4. स्याद्वादमञ्जरी 30
5. मुण्डकोपनिषद् भाष्यम् 3-1-17
6. न्यायावतारः 29
7. गीता
8. गीता
9. भाष्यम्
10. ब्रह्मसूत्रभाष्यम्
11. ब्रह्मसूत्रभाष्यम्
12. अद्वयवज्रसंग्रहः
13. तिलोयपण्णत्तिः 1.83
14. सन्मतितर्कप्रकरणम् 1.28
15. पंचास्तिकायः 14
16. तत्त्वार्थसूत्रम्

स्याद्वादसन्दर्भे नैयायिकानां दृष्टिः

–डॉ. विष्णुपदमहापात्रः*

इह खलु संसारे ज्ञानस्य कापि सीमा नास्ति। असीमात्मकस्य ज्ञानस्यावधारणाय शास्त्रकाराः साहित्यिकाः दार्शनिकाः सततचिन्तनपरायणाः भवन्ति। दर्शनस्य मुख्यमुद्देश्यं भवति नवीनानां तथ्यानामन्वेषणम्। तादृशं च तथ्यं आत्मा। आत्मतत्त्वसाक्षात्करणाय अनवरतप्रयत्नशीलाः भवन्ति दार्शनिकाः। द्वादशप्रकारकभारतीयदर्शनेषु तत्तद्दार्शनिकाः ततसम्प्रदायाश्च स्व स्व मतं पोषयन्ति। यथा प्रतीत्यसमुत्पादवादे शून्यवादे क्षणिकविज्ञान-वादे च बौद्धाः प्रवर्तन्ते। विवर्त्तवादे अनिर्वचनीयतावादे च अद्वैतिनः, सत्कार्यवादे परिणामवादे सांख्याः, असत्कार्यवादे आरम्भवादे च न्यायवैशेषिकाः प्रवर्तन्ते तथैव अनेकान्तवादे स्याद्वादे वा जैनाः प्रवर्तन्ते। जैनाः स्याद्वादस्य तत्त्वस्थापनाय सप्तभंगीनयं स्थापयन्ति। तत्रेदमवधातव्यं यत् जैनानां नये ज्ञानस्य साधनं प्रमाण-नय-भेदाद् द्विविधम्। तेषां मते साधारणतः प्रत्यक्षानुमानशब्दभेदात् त्रिविधं प्रमाणम्। अनुमानं न्यायदर्शनमिव स्वार्थपरार्थ-भेदेन द्विविधं भवति। तत्रापि परार्थानुमानं न्यायदर्शनमिव प्रतिज्ञादिपञ्चावयव-साध्यं भवति, मन्ये अत्र न्यायदर्शनमतं समर्थयन्ति जैनाः।

तत्र जैनन्यायशास्त्रे परामर्शः सप्तवाक्यात्मको भवति। स च सप्तभंगीन्याय नयो वा। भंगशब्दस्यार्थो भवति समुच्चयः, अतः यत्र अस्तित्वनास्तित्वादीनां समुच्चयो भवति स सप्तभंगीनयः। उत वा सांख्यादिसप्तदार्शनिकप्रतिपादितैकान्तवादं निराकुर्वन् यत्र अनेकान्तवादस्य स्थापनं स सप्तभंगीनय इति केचन प्रतिपादयन्ति। नयशब्दस्य कोऽर्थ इति जिज्ञासायामित्थं वक्तुं शक्यते यद् यदा कश्चन पुरुषः रक्तपुष्पं पश्यति

---

* सहायकाचार्यः न्यायदर्शनविभागे, श्री ला.ब.शा.रा.सं.विद्यापीठम्, नवदेहली

तदा तद् रक्तपुष्पं निर्दिष्टदेशकालावच्छेदेन सीमावद्धं भवति। तादृशदेशकालवद्धपुष्पस्य ज्ञानं इन्द्रियादिसन्निकर्षेण भवति। अत: तादृशज्ञानं प्रमाणाधीनं भवति। किन्तु तदेव रक्तपुष्पं विभिन्नेषु कालेषु विभिन्नासु अवस्थासु च दृश्यते। दृश्यमानस्य जगत: किमपि वस्तु देशकालातीतं न भवति। जगति असंख्यानि वस्तुनि सन्ति, तेषां परस्परसम्बन्धोऽपि विद्यते। एतेषां वस्तूनां या सत्ता सा विभिन्नेषु समये विभिन्नाया: अवस्थाया: उपरि समाश्रिता एवञ्च अवस्थाया: वैचित्र्यात् सृष्टेरपि वैचित्र्यं समागच्छति ''अनन्तधर्मात्मकं वस्तु'' अत: अवस्थाया: अन्तत्वाभावाद् वस्तुनि गुणधर्मयोर्वा सीमावद्धत्वाभावाच्च आपेक्षिकतावादं स्वीकुर्वन्ति जैना:। एतादृशापेक्षि-कतावादत: अनेकान्तवादस्योत्पत्ति:। विभिन्नदेशकालदृष्टिभंगौ एकस्य पुष्पस्य विषये भिन्नं भिन्नं वचनं निर्मातुं शक्यते यत: प्रतिवचनस्य पश्चाद्भागे एका दृष्टिभंगी विद्यते। एतादृशदृष्टिभंगीपदार्थ: नयपदार्थ एव। अवस्थाया: अनन्तवैचित्र्याद् वस्तु अनन्तवैचित्र्यं प्रयच्छति इत्यत नयोऽपि अनन्त:। वस्तुत: तत् सप्तविधम्! दृष्टिभेदात् सृष्टेरपि भेद:। मन्ये अद्वैतसिद्धिकार: पूर्वपक्षरूपेण दृष्टिसृष्टिवादपक्षमुपस्थापितवान्। दृष्टिभेदात् सृष्टिभेदस्य पक्षस्थापनाय जैना: स्याद्वादस्य समर्थनं कुर्वन्ति।

जैनदर्शने नय: सप्तविध: स च (1) स्यादस्ति (2) स्यान्नास्ति (3) स्यादस्ति च नास्ति (4) स्यादवक्तव्य: (5) स्यादस्ति चावक्तव्य: (6) स्यान्नास्ति चावक्तव्य (7) स्यादस्ति च नास्ति चावक्तव्य:। इति।

सप्तभंगीनयान्तर्गत 'स्यात्' शब्दस्यार्थो भवति सापेक्षता उत वा अनेकान्तता। यदि कस्यापि वस्तुन: अस्तित्वं अस्ति इति उच्यते तदा देशकालभाववर्णादित: तस्य विरोध:। अत: सर्वत्र वस्तुनि विधिनिषेधयो: परामर्श विद्यते। किमपि कालादिसापेक्षं एकस्मिन् वस्तुनि विधिनिषेधेयो: सद्भावाद् अनिश्चयावस्थाम् अनेकान्तवादं सूचयति। निश्चयानेकान्तवादे कस्यापि वस्तुन: सत्त्वासत्त्वयो: निश्चय: नैव भवति।

तत्र सप्तपक्षेषु एकैकपक्षं ये समाश्रयन्ति तेषामयमभिप्राय:-

(1) स्यादस्ति इति प्रथमपक्ष: सांख्यानाम्। यत: सांख्या:पदार्थानां सत्त्वं सदा स्वीकुर्वन्ति।

(2) स्यान्नास्ति इति पक्ष: माध्यमिकबौद्धानाम्, यत: शून्यवादिन: सदा पदार्थानां नास्तित्वं स्वीकुर्वन्ति।

(3) स्यादस्ति च नास्ति च इति तृतीय पक्ष: नैयायिकानाम्, यत: उत्पत्ते: प्राक् पदार्थानामभाव: उत्पत्त्यनन्तरं तस्य भावत्वं नाशान्तरं च तस्य अभावत्वं स्वीकुर्वन्ति। कालभेदात् सत्वासत्त्वे स्वीकुर्वन्ति। जैनानामिव नहि एकप्रकारकम्।

(4) स्यादवक्तव्य इति चतुर्थपक्ष अद्वैतिनाम्। यत: जगदुपादानं या माया तस्या: मायाया: अनिर्वचनीयत्वं स्वीकुर्वन्ति। मायात: उत्पन्नं वस्तु प्रतीतिकाले "नास्तीति" रूपे पश्चाच्च बाधितं भवति। सत्त्वावस्थायां पदार्थ: असद् भवति। न अस्तित्वं न नास्तित्वं अनयो: विरोधिद्वयो: वर्णनमनिर्वाच्यमेव।

(5) स्यादस्ति चावक्तव्य: इति पक्ष वेदान्तिनाम्, यत: मायातत्त्वं स्वीकुर्वन्त: वेदान्तिन: सांख्योक्तपदार्थानां सत्तामभ्युपगत्यपि मायात: संसारस्य अनिर्वचनीयत्वं स्वीकुर्वन्ति।

(6) स्यान्नास्ति चावक्तव्य: इति पक्ष: मायावादैकदेशिनाम्, यत: मायावादैकदेशिन: शून्यवादोक्तपदार्थानां नास्तित्वस्वीकारेऽपि मायाकृतानिर्वाच्यत्वं स्वीकुर्वन्ति।

(7) स्यादस्ति च नास्ति चावक्तव्य: इति पक्ष: वेदान्तैकदेशिनाम्, यत: वेदान्तैकदेशिन: न्यायप्रतिपादितासत्त्वासत्त्वपदार्थेन सह मायिकानिर्वाच्यत्वं स्वीकुर्वन्ति।[3]

अनन्तवीर्येण इत्थं नयवाद: प्रकटित:–

तद्विधानविवक्षायां स्यादस्तीति गतिर्भवेत्।
स्यान्नास्तीति प्रयोगः स्यात्तन्निषेधे विवक्षिते॥

क्रमेणोभयवाञ्छायां प्रयोगः समुदायभाक्।
युगपत्तद्विवक्षायां स्यादवाच्यमशक्तितः॥

आद्यावाच्यविवक्षायां पञ्चमो भंग इष्यते।
अन्त्यावाच्यविवक्षायां षष्ठभंगसमुद्भवः।
समुच्चयेन युक्तश्च सप्तमो भंग उच्यते।।[4]

मन्ये जैनदार्शनिकैः यत्स्याद्वादः निर्मितः तत्र स्याद्वादे नैयायिकानां कथञ्चिद् दृष्टिः विद्यते इति वक्तुं शक्यते। यतः सर्वतादौ संयोग-सम्बन्धेन धूमस्य सद्भावेऽपि तत्रैव समवायसम्बन्धेन तस्य नास्तित्वमपि सिद्धयति। एवञ्च व्याप्तेः स्वरूपनिर्वचनावसरे मणिकारैः पूर्वपक्षरूपेण ''साध्याभावाधिकरणनिरूपितवृत्तित्वाभावो'' इत्यादि पञ्चप्रकारकव्याप्तिलक्षणं यदुपपादितं तत्र केवलान्वयिसाध्यकसद्धेतौ इदं वाच्यं ज्ञेयत्वादित्यत्र भवति अव्याप्तिः, तदव्याप्तेः परिहारार्थं सौन्दडनैयायिकाभिमतव्यधिकरण-धर्मावच्छिभावमभ्युपगत्य मणिकाराः प्रवदन्ति-समवायितया वाच्यत्वाभावो घटे एव प्रसिद्धः इति। एतेन ज्ञायते यद् घटादौ स्वरूपसम्बन्धेन वाच्यत्वस्य विद्यमानतादशायां समवायसम्बन्धेन वाच्यत्वाभावस्य सद्भावात् स्यादस्तित्वं स्यान्नास्तित्वं च संगच्छते। एवञ्च धूमाधिकरणे पर्वतादौ वह्नेः सत्त्वदशायां अर्थाद् वह्नित्वेन वह्नेः सद्भावेऽपि घटत्वेन वह्न्यभावस्यापि तत्र विद्यमानत्वात् सापेक्षिकत्वेन सत्त्वमसत्त्वं च सिद्धयति। एवञ्च सिषाधयिषा-विरहविशिष्टसिद्धयभावस्य पक्षतात्वस्वीकारपक्षेऽपि सिद्धिसमकाले सिषाधयिषायाः सत्त्वेऽपि अनुमितिर्भवति, तत्र विशेषणाभावप्रयुक्तविशिष्टाभावं स्वीकृत्य कारणत्वं कल्प्यते, तत्रापि सिद्धिसमकामाले सिद्धयभावस्य स्वीकाराद् अस्तित्वं नास्तित्वं च सिद्धयति। अनेन ज्ञायते स्थलविशेषे अनेकान्तवादविषये स्याद्वादविषये वा नैयायिकानां दृष्टिरस्त्येव।

सन्दर्भाः–

1. एकदेशविशिष्टोऽर्थो नयस्य विषयो मतः, न्यायावतारः, पृ. 29
2. सर्वदर्शनसंग्रहः, पृष्ठ 146
3. भारतीयदर्शनेर मर्मकथा (बंगला) पं. हरिदास वनज, जैनदर्शनभागः।
4. सर्वदर्शनसंग्रहः, पृष्ठ 149

विरोधमथनं नमाम्यनेकान्तम्

–डॉ. अनेकान्तकुमारो जैनः*

प्रत्येकदर्शनं जगतः वास्तविकरूपस्य दर्शनं कर्तुं प्रयतते। इदम् इन्द्रियगोचरं जगत् यस्मिन् रूपे सर्वसाधारणस्य समक्षमस्ति, तस्मिन् एव रूपे तत् दार्शनिकानाम् समक्षं उपस्थितमस्ति। सर्वसाधारणः जनः जगत् तस्मिन्नैव रूपे गृह्णाति, यस्मिन् रूपे तत् उपलभ्यते, किन्तु दार्शनिकः? दार्शनिकाः किं विचारयन्ति?

उक्तवान् कश्चन दार्शनिकः–

इन्द्रियैरुपलब्धं यत् तत् तत्त्वेन भवेद्यदि।
जातास्तत्त्वविदो बालास्तत्त्वज्ञानेन किं तदा॥

वस्तुतः इदमस्ति दार्शनिकानां मूलसमस्या। इति रूपे घोषणां कृत्वा जगतः तात्त्विकस्वरूपं ज्ञातुं प्रयतते, एतत्फलस्वरूपं च ज्ञातस्य तात्त्विकस्वरूपस्य निर्देशेन सः जगतः इन्द्रियोपलब्धस्य रूपस्य व्याख्याम् प्रस्तौति। इयं व्याख्या एव एकस्य दर्शनस्य स्वरूपं गृह्णाति। सुदूरात् अतीतकालात् आरभ्य अधुनावधि जगतः मूलं तात्त्विकं वा स्वरूपं ज्ञातुम् अनवरतरूपेण प्रयत्नः क्रियमाणः वर्तते स्म, इदानीं च निरन्तरं क्रियमाणः वर्तते। किन्तु तस्य सम्बन्धे अद्यावधि मतैक्यं स्थापितं भवितुं न अशक्नोत्, न च कापि एतादृशी आशा एवास्ति। असंख्यरूपेषु जगतः वर्तमानस्वरूपस्य व्याख्याः प्रस्तुताः अभवन्, यासु पूर्णरूपे कतिपयाः एव अद्य विभिन्नानां दर्शनानां रूपे उपलब्धाः सन्ति। कतिपयानां केचनांशाः एव यत्र-तत्र निर्दिष्टाः सन्ति, अवशिष्टानां च असंख्यानां दर्शनानां नामन्यपि अतीतस्य

* स. आचार्यः, जैनदर्शनविभागेः, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली

गर्भे समाहितानि। जगतः स्वरूपस्य सम्बन्धे अद्य उपलब्धासु उक्तासु अनेकासु व्याख्यासु काश्चन ताः अपि सन्ति या विभिन्नानां भारतीयदर्शनानां रूपे वर्तन्ते।

अनेकान्तदर्शनस्यावश्यकता

भारतवर्षे अनादिकालादेव 'अहम्, विश्वञ्चेत्युभयोर्विषये' व्यष्ट्या-समष्ट्या च चिन्तनं चिरात्प्रवर्तितं सदद्यापि परिशील्यतेव। ऋषिभिरैहिकचिन्तां परित्यज्यात्मतत्त्वान्वेषण एव स्वशक्तेः प्रयोगो विहितः। अस्यैवान्वेषणस्य धुर्यामिदं जगच्चक्रं परिभ्रमत तिष्ठति।

सामान्यतः अन्यदार्शनिकैः प्रतिपादितानि विभिन्नानि मतानि अस्मभ्यं न रोचंते। किमप्येक मतं स्वीकृत्य वयं सत्यान्वेषणं कुर्मः। किन्तु सामाजिकदृष्ट्या विभिन्न राष्ट्र-प्रदेशभाषा-धर्मैः सह वयं समन्वयं स्वीकुर्मः यतोहि समन्वयदृष्टिं विना शान्तिपूर्णसहास्तित्वं भवितुं न शक्नोति। प्राणिनः एकाकीस्थातुं न शक्नुवन्ति, सामाजिकत्वात्। अतएव स्व-पार्श्ववर्तिभिः सह सम्बन्धं संस्थाप्य सर्वतो वातावरणं शान्तमपेक्षते। अथ च सोऽभिलषति, यत्कथं वयं रागद्वेषद्वन्द्वविरहिता भूत्वा निराकुलाः स्याम? समाजे जगति च कथं सुखशान्तेः साम्राज्यं स्यात्? आभ्य एव चिन्ताभ्यः समाजस्यानेके प्रयोगाः निष्पन्नाः अभवन् भवन्ति, भविष्यति च।

भारतीयदर्शनेषु प्राचीनतमजैनदर्शनस्य 'अनेकान्तसिद्धान्तं दर्शने समाजे च समन्वय-सहास्तित्वाय एक आधारभूतसिद्धान्तरूपेण स्थापितमस्ति। अनेकान्तवादः जैनदर्शनस्य वैशिष्ट्यमस्ति। अनेकान्तदर्शनम् अर्थात् जैनदर्शनमित्येवमिदं जैनदर्शनस्य पर्यायमेव भूतम्। जैनदर्शनानुसारेण प्रत्येकवस्तुस्वरूपमनेकान्तात्मकं विद्यते।

वस्तुनोऽनन्तधर्मात्मकत्वात् यो धर्मो येनानुभूतः सापेक्षो निरपेक्षो वा स्वस्य भावनाविवेकादिभित्तौ तमेव प्रतिपादितवान् वस्तुत्वेन। तत्तु स्वीकृतं पृथग्भूतदर्शनत्वेन तदानीन्तनैर्जनैः। एवंविधैः विभिन्नैः दृष्टिकोणैः वस्तुनः प्रतिपादने विभिन्नानि दर्शनानि समुत्पन्नानि। प्रतिफलत्वेन यद्दर्शनस्योद्भूतिः धर्मजिज्ञासातो वस्तुस्वरूपावलोकनप्रयत्नेन वा भवति।

उक्तं च अमृतचन्द्राचार्यैः

'परमागमस्य जीवं निषिद्धजात्यन्धसिन्धुरविधानम्।
सकलनयविलसितानां विरोधमथनं नमाम्यनेकान्तम्॥
(पुरुषार्थसिद्ध्युपायः 2)

वस्तुतत्त्वप्रतिपादने जैनदृष्टिः कीदृशी अस्ति? अनेकान्त-स्याद्वादसिद्धान्तं ज्ञात्वा वयं ज्ञातुं शक्नुमः।

अनेकान्तस्वरूपम्

आचार्यकुन्दकुन्दविरचितसमयसारस्यात्मख्यातिटीकायाः परिशिष्टे स्याद्वादाधिकारे (1100 AD)आचार्येणामृतचन्द्रेणातिसरलसुष्ठुशब्देषु अनेकान्तस्य लक्षणं निम्नरूपेण विशदीकृतम्।[1]

'तत्र यदेव तत्तदेवातत्, यदेवैकं तदेवानेकं, यदेव सत्तदेवासत् यदेव नित्यं तदेवानित्यमित्कवस्तुवस्तुत्वनिष्पादकपरस्परविरुद्धशक्ति द्वयप्रकाशनमनेकान्तः।'

तैः उक्तञ्च स्याद्वादो हि समस्तवस्तुतत्त्वसाधकमेकस्खलितं शासनमर्हत्सर्वज्ञस्य। स तु सर्वमनेकान्तात्मकमित्यनुशास्ति सर्वस्यापि वस्तुनोऽनेकान्तस्वभावत्वात्। अत्र त्वात्मवस्तुनि ज्ञानमात्रतया अनुशास्मानेऽपि न तत्परिकोपः, ज्ञानमात्रस्यात्मवस्तुनः, त्वयमेवानेकान्तत्वात्। अनन्तरं प्रतिपादयन्ति- तत्स्वात्मवस्तुनो ज्ञानमात्रत्वेऽप्यन्तश्चकचकायमानज्ञानस्वरूपेण तत्त्वात्। बाहिरुन्मिषदनन्तज्ञेयतापन्नस्वरूपातिरिक्तपररूपेणातत्त्वात्, सहक्रमप्रवृत्तानन्त-चिदंशसमुदयरूपाविभागद्रव्येणैकत्वात्, अविभागैकद्रव्यव्याप्तसहक्रमप्रवृत्ता-नन्तचिदंशरूपपर्ययैरनेकत्वात् स्वद्रव्यक्षेत्रकालभावभवनशक्तिस्वभाववत्त्वेन सत्त्वात् परद्रव्यक्षेत्रकालभावाभवनशक्तिस्वभवावत्त्वेनाऽसत्त्वाद्, अनादिनिधना-विभागैकवृत्तिपरिणतत्वेन नित्यत्वात्, क्रमप्रवृत्तैकसमयावच्छिन्नानेकवृत्त्यंश-परिणतत्वेनानित्यत्वात्, तदतत्त्वमेकानेकत्त्वं सदसत्त्वं नित्यानित्यत्वं च प्रकाशत एव।

व्युत्पत्तिः- अनेकान्तशब्दः अनेकः + अन्तः इतिशब्दद्वयसंयोगेन व्युत्पन्नः वर्तते। अनेकस्यार्थः एकस्मादधिकम्। एकस्मादधिकं द्वावपि

अनन्तोऽपि। द्वयोरनन्तानां मध्येऽनेकार्थं सम्भाव्यते। अन्तशब्दस्यार्थः धर्मः गुणो वा। यत्रानेकस्यार्थः अनंतो भविष्यति तत्रान्तस्यार्थः गुणो ज्ञेयः। अनया व्याख्यया अनन्तगुणात्मकं वस्त्वेवानेकान्त इति। यत्रानेकस्यार्थः द्वौ-इति तत्रान्तस्यार्थो धर्म इति स्यात्। तदित्थम् ज्ञेयम्-परस्परं विरुद्धप्रतीतिभूतस्य धर्मद्वयस्यैकास्मिन्नेव वस्तुनि वर्तमानमनेकान्तमस्ति।[2]

वस्तुस्वभावः

सर्वेषां द्रव्याणां सत्सामान्येनैकत्वम्, स्वस्वरूपचतुष्टयत्वेन चानेकत्वम्। इत्थमेवेदं समग्रमपि विश्वमनेकात्मकमपि व्यवहारार्थं संग्रहेणैकमेव कथ्यते। एकं हि द्रव्यं स्वगुणपर्यायैःअनेकात्मकम्, एक एवात्मा हर्षविषादसुख-दुःख-ज्ञानादिभिरनेकरूपात्मकोऽनुभूयते। द्रव्यमन्वयरूपम्, पर्यायाश्च व्यतिरेकरूपाः। द्रव्यमेकं, पर्यायाश्चानेकाः। द्रव्यस्यानाद्यनन्तत्वम् पर्यायाणाञ्च प्रतिक्षणं विनाशशीलत्वम्। इत्थं द्रव्यस्यैकत्वेऽपि यदानेकात्मकता प्रतीतिसिद्धा वर्तते।

एकस्मिन् वस्तुनि एकस्मिन्नैव काले बहवः धर्माः कथं सम्भवन्ति?

द्रव्यस्य (वस्तुनः) अनन्तधर्मात्मकत्वविषये बहुधा जनाः विवदन्ते, यत् घटे यदा अस्तित्वं, तदा कथं तस्य नास्तित्वम्? घटस्य यदैकत्वम्, तदा कथमनेकत्वं तस्य? किन्त्वत्र विचारे कृते सति ज्ञायते-यद्घटो घट एव न वस्त्रम्, नापि किञ्चिदन्यत्। अस्यायमभिप्रायो वर्तते, यत् घटो तद्भिन्नानन्तपदार्थात्मको यदि नास्ति, तद् घटः स्वरूपेणास्ति, पररूपानन्तपदार्थात्मकाभावात् पररूपात्मको नास्ति, यदि नेत्थं स्यात्, तदा घटः पट एव स्यादन्यत्कश्चिद्वा स्यात्। अत्रेदं पररूपव्यावर्तकं नास्तित्त्वं मेव घटस्यास्तित्वं स्थापयति। अस्मिन्नेव घटे रूप-रस-गन्ध-स्पर्श-लघुत्व-दीर्घत्व-सूक्ष्मत्वादयो गुणधर्माः सन्ति। एषामपेक्षया तु घटोऽनेकधर्मात्मको वर्तते, यथा खलु घटेऽनेके धर्माः गुणाः वा विद्यन्ते। तथैव प्रत्येकस्मिन् द्रव्ये द्रव्यत्वादेकत्वेऽपि परस्परं विरुद्धा अनेकधर्मगुणाः स्पष्टमेव प्रतिभासन्ते। अत एवात्र संशयविरोध युक्तेभ्यो धर्मकीर्तिनेदं प्रतिपादितम् –**'यदीयं स्वयमर्थेभ्यो रोचते तत्र के वयम्'**। अतः द्रव्यस्य स्वद्रव्यकालभावापेक्षया भावत्वम् परद्रव्यक्षेत्रकालभावापेक्षया चाभावत्वमपि वर्तते।

धर्मो गुणश्च द्वावपि वस्तुनः नित्यावयवौ स्तः। परन्तु द्वयोरन्तरोऽपि विद्यते। धर्माः सदा सापेक्षाः भवन्ति। परस्परं विरूद्धप्रतीयमानाः युगलरूप एवोपलभ्यन्ते यथा नित्यानित्यता-एकानेकादिः। गुणाः निरपेक्षाः विशेषाभासरहिताः भवंन्ति यथाऽत्मनः ज्ञानदर्शनसुखादयः। अनेकान्तप्रकरणे-मुख्यरूपेण परस्परं विरुद्धप्रतीयमानानां धर्माणामेव चर्चा विधीयते। वस्तुनि सम्भाव्यमानाः परस्परविरुद्धधर्मा एवोपलभ्यन्ते नत्वसम्भाव्याः। यथाऽत्मनि नित्यानित्यरूपसम्भाव्यमानाः विरुद्धधर्मास्तु विद्यमानाः सन्ति परन्तु चेतनाचेतनरूपविरुद्धधर्माणामसत्ता विद्यते। वस्तुतः चेतनाचेतने परस्परं विरुद्धधर्मो स्तः परन्तु नित्यत्वमनित्यत्वञ्च परस्परं विरुद्धौ नापितु परस्परं विरोधिनौ प्रतीयेते। तेषां सत्ता एकस्मिन् द्रव्ये सदैव प्राप्यते।

परस्परं विरोधिप्रतीयमानानां धर्माणां सत्तास्वीकारे वस्त्वभावः सिद्धो भविष्यति। वयं यदि वस्तुनः एकान्तम् अस्तिरूपमेव स्वीकुर्मस्तदा नास्तित्वस्याभावे सर्वाणि द्रव्याणि परस्परं मिलिष्यन्ति अर्थात् वस्तुव्यवस्थायाः विनाशो भविष्यति। एवमेकान्तनित्यवस्तुनिअर्थक्रिया तथा कार्याभावे तस्याभावः सिद्धो भविष्यति। एकान्तानित्यवस्तुनः क्षणांतरं पूर्णतः नाशो भविष्यति। अतोऽनेकान्तात् विपरीतमेकान्तात्मकवस्तुस्वरूपस्य कल्पनायां वस्तुनः एव नाशः सिद्ध्यति।

अनेकान्तात्मकवस्तुस्वभावः प्रमाणसिद्धः। जगतः प्रत्येकं वस्तु अस्माकं कृते प्रतिसमयं परिणमत् नित्यप्रतीतं भवति। अतः अखिलविश्वे समस्तद्रव्याणि अनेकान्तस्वरूपाणि सन्ति।[3]

अनेकान्तस्य भेदाः

अनेकान्तोऽपि सम्यग्मिथ्यापेऽक्षया द्विविधोस्ति। सम्यगनेकान्तः मिथ्याऽनेकान्तश्च। सुप्रसिद्धजैननैयायिकाचार्याः अकलंकदेवाचार्याः (700 A.D.) तत्त्वार्थराजवार्तिकग्रन्थे इदं विषयमवलम्ब्य विशिष्टप्रतिपादनं कृतवन्तः। तेषामनुसारेण एकान्तो द्विविधः-सम्यगेकान्तो मिथ्यानेकान्त इति। तत्र सम्यगेकान्तो हेतुविशेषसामर्थ्यापेक्षः प्रमाणप्ररूपितानेर्थैकदेशादेशः। एकात्मावधारणेन अन्याशेषनिराकरणप्रवणप्रणिधिर्मिथ्यैकान्तः। एकत्र सप्रतिपक्षानेकधर्मस्वरूपनिरूपणो युक्त्यागमाभ्यामविरुद्धः सम्यगनेकान्तः।

तदतत्स्वभाववस्तुशून्यं परिकल्पितानेकात्मकं केवलं वाग्विज्ञानं मिथ्याऽनेकान्तः। तत्र सम्यगेकान्तो नय इत्युच्यते। सम्यगनेकान्तः प्रमाणम्। नयार्पणादेकान्तो भवति एकनिश्चयप्रवणत्वात्, प्रमाणार्पणादनेकान्तो भवति अनेकनिश्चयाधिकरणत्वात्। यद्यनेकान्तोऽनेकान्त एव स्यान्नैकान्तो भवेत्, एकान्ताभावात् तत्समूहात्मकस्य तस्याप्यभावः स्यात्, शाखाद्यभावे वृक्षाद्यभाववत्। यदि चैकान्त एव स्यात्; तदविनाभाविशेषनिराकरणादात्मलोपे सर्वलोपस्यात्क।[4]

'अपि' तथा 'एव' प्रयोगाः

अनेकान्तस्याद्वादपद्धतौ 'अपि तथा एव' शब्दयोः समानमहत्त्वं विद्यते। 'अपि' शब्दः दृढ़तायाः सूचकः न तु समन्वयस्य। अस्य प्रयोगस्य कः विधिः? यथा यत्रापेक्षां नोक्त्वा केवलं ''काचिदपेक्षा'' कथ्यते तत्र 'अपि' शब्दस्य प्रयोगः आवश्यकः। यत्रापेक्षा स्पष्टा भवति तत्र 'एव' इति प्रयोगोऽनिवार्यो भवति। यथा प्रत्येकं वस्तु कथंचित् नित्यमपि कथंचिदनित्यमपि। यदि इदमेव वयमपेक्षाशब्दं संयोज्य कथयिष्यामः तदेत्थम् कथनीयम्–'प्रत्येकवस्तुद्रव्यापेक्षया नित्यमेवास्ति तथा पर्यायापेक्षयाऽनित्यमेव। अपि शब्दः द्योतते यत् वयम् यत्किञ्चित् कथयामः न तावन्मात्र वस्तु अन्यदपि।

'एव' शब्दः द्योतते यदन्यकोणेरवलोकने वस्तु अन्यत् वहु अस्ति परन्तु येन कोणेन इदमुच्यते इदित्यमेव, नास्ति तत्र शंकावकाशः। अतः 'अपि' शब्द 'एव' शब्दश्च परस्परं पूरको स्तः, न तु विरोधिनौ। एवं शब्दः स्वविषये समस्तशंकां निवार्य दृढ़तां वितरति तथा अपि शब्दः अपरपक्षविषये मौनो भूत्वापि तेषां निश्चितसत्तां सूचयति, न तु तेषां सम्भावनाम्।

'एव' शब्दः सम्यगेकान्तस्य सूचकोऽस्ति तथा 'अपि' शब्दः सम्यगनेकान्तस्येति। अनेकान्तवादिनः जैनदर्शनमनेकान्तोऽप्यनेकान्तं स्वीकुर्वन्ति। समन्तभद्राचार्याः (400 A.D.) जैनन्यायस्य प्रविष्ठापकाचार्याः आसन्। तैः स्वयम्भूस्तोत्रे उक्तं[5]–

अनेकान्तोऽप्यनेकान्तः प्रमाणनयसाधनः।
अनेकान्तः प्रमाणात्ते तदेकान्तोऽर्पितान्नयात्॥

प्रमाणनयौ साधनौ यस्येवं भूतोऽनेकान्तोऽप्यनेकान्तस्वरूपोऽस्ति यतः सर्वांश ग्राहिप्रमाणापेक्षया वस्तु अनेकान्तस्वरूपं तथा अंशग्राहिनयापेक्षया वस्तु-एकान्त रूपं सिद्धमिति।

चतुर्विधभेदाः

सुप्रसिद्धजैनाचार्याः हेमचन्द्राः (1100 A.D.) अन्ययोगव्यवच्छेदि-काद्वात्रिंशिकायां अनेकान्तसिद्धान्तस्य चातुर्विध्याभिधानद्वारेण वर्णयन्नाह[6]–

स्यान्नाशि नित्यं सदृशं विरूपं
वाच्यं न वाच्यं सदसत्तदेव।
विपश्चितां नाथ निपीततत्त्व-
सुधोद्गतोद्गारपरम्परेयम्॥ कारिका–25

हेमचन्द्राचार्यस्य अस्य ग्रन्थस्य सुप्रसिद्धा टीका 'स्याद्वादमञ्जरी' मल्लिषेणसूरिः (1300 A.D.) विरचितम्। टीकायां अस्याः कारिकायाः विस्तृतविवेचनमपि अस्ति। तस्मिन् चतुर्विधभेदानां वर्णनं इत्थं प्रकारेणास्ति–'स्यादित्यव्ययमनेकान्तद्योतकमष्टस्वपि पदेषु योज्यम्। तदेव अधिकृतमेवैकं वस्तु स्यात् कथञ्चिद् नाशि विनशनशीलमनित्यमित्यर्थः। स्यान्नित्यम् अविनाशिधर्मीत्यर्थः। एतावता नित्यानित्यलक्षणमेकं विधानम्। तथा स्यात् सदृशमनुवृत्तिहेतुसामान्यरूपम्। स्याद् विरूपं विविधरूपम् विसदृशपरिणामात्मकं व्यावृत्तिहेतुविशेषरूपमनित्यर्थः। अनेन सामान्यविशेषरूपो द्वितीयः प्रकारः। तथा स्याद् वाच्यं वक्तव्यम्। स्याद् न वाच्यमवक्तव्यभित्यर्थः। अत्र च समासेऽवाच्यमिति युक्तम्, तथाप्यवाच्यपदं योन्यादौ रूढमित्यसम्यता-परिहारार्थं न वाच्यमित्यसमस्तं चकार स्तुतिकारः। एतेनाभिलाप्यानभिलाप्य-स्वरूपस्तृतीयो भेदः। तथा स्यात्सद् विद्यमानमस्ति रूपमित्यर्थः। स्याद् असत् तद्विलक्षणमिति। अनेन सदसदाख्या चतुर्थी विधा।[7]

किं अनेकान्तः छलमात्रमस्ति?

शंकाकारेण शंका क्रियते–'तदेवास्ति तदेव नास्ति तदेव नित्यं

तदेवानित्यम्' इति चानेकान्तप्ररूपणं छलमात्रमिति'। अकलंकदेवाचार्याः राजवार्तिके समाधानं दत्तवन्तः–'तन्न; कुतः? छललक्षणाभावात् छलस्य हि लक्षणमुक्तम्[8]–'वचनविघातोऽर्थविकल्पोपपत्त्या छलम्' इति। यथा 'नवकम्बलोऽयम्' इत्यविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पनम् 'नवास्य कम्बला न चत्वारः इति, नवो वास्य कम्बलो न पुराणः' इति नवकम्बलः। न तथा अनेकान्तवादः। यत् 'उभयनयगुणप्रधानीभावापादितार्पितानर्पितव्यवहार–सिद्धिविशेषबललाभप्रापितयुक्तिपुष्कलार्थः अनेकान्तवादः।[9]

किं संशयहेतुरनेकान्तवादः?

पुनश्च शंका भवति– संशयहेतुरनेकान्तवादः। कथम्? एकत्राधारे विरोधिनोऽनेकस्यासंभवात्। आगमश्चैवं प्रवृत्तः–'एकं द्रव्यमनन्तपर्यायम्' इति। किमागमप्रामाण्यादस्ति वा नास्ति वा नित्यं वा अनित्यं वेति?

राजवर्तिककाराः समाधानं दत्तवन्तः–'तच्च न; कस्मात्? विशेषलक्षणोपलब्धेः। इह सामान्यप्रत्यक्षाद्विशेषाप्रत्यक्षाद्विशेषस्मृतेश्च संशयः। तद्यथा स्थाणुपुरुषोचिते देशे नातिप्रकाशान्धकारकलुषायां वेलायामूर्ध्वत्वमात्रं सारूप्यं पश्यतो वक्रकोटरवयो निलयनादीन् स्थाणुगतान् विशेषान् वस्त्रसंयमनशिरः कण्डूयन–शिखा–बन्धनादीन् पुरुषगतांश्चाऽनुपलभमानस्य तेषां च स्मरतः–संशयः–उत्पद्यते, न च तद्वदनेकान्तवादे विशेषानुपलब्धिः, यतः स्वरूपाद्यादेशवशीकृता विशेषा उक्ता व्यक्ताः प्रत्यक्षमुपलभ्यन्ते। ततो 'विशेषोपलब्धेर्न संशयहेतुः' इति यदगदिष्म तत्सम्यग्निरजैष्म।[10]

अनेकान्त–स्याद्वादयोः सम्बन्धः

वस्तुनोऽनेकान्तस्वरूपप्रतिबोधिका सापेक्षकथनपद्धतिः स्याद्वादः उच्यते। अनेकान्तो वस्तुस्वभावस्तथा स्याद्वस्तुतत्प्रदिपादिकायाः वाचो धर्मोऽस्ति। अनेकान्ते स्याद्वादे च द्योत्यद्योतकभावसम्बन्धो विद्यते।

जैनेन्द्रसिद्धान्तकोशे स्याद्वादस्यार्थः एवमुक्तः[11]–'अनेकान्तमयवस्तु कथनपद्धतिः स्याद्वादोऽस्ति। केनचिदेकेन शब्देन वाक्येन वा समस्त वस्तूनां युगपत् कथनमशक्यत्वात् प्रयोजनवशात् कदाचित् एकं धर्मं मुख्यं कृत्वा कथनं क्रियते कदाचिदन्यवेति। मुख्यं धर्मं श्रृण्वन् श्रोता गौणरूपेणान्यं

धर्ममपि स्वीकारं करोति तस्य निषेधो न भूयादनेन प्रयोजननेन अनेकान्तवादी स्वप्रत्येकवाक्येन सह 'स्यात्-कथञ्चित्' इति शब्दप्रयोगं करोति अतः स्यात् पदमविवक्षितधर्मान् गौणम् निदधाति न तु तस्याभावरूपम्।

स्याद्वादस्य महत्त्वम्–

स्याद्वादो जैनदर्शनस्य प्राणमस्ति। दर्शनानाञ्च संयोजकमेकं सूत्रमत एव जैनदर्शनीयचिन्तनधारायामस्य विशिष्टं स्थानं विद्यते। अस्य बीजानि सहस्राब्देभ्यः प्रागेव जैनागमेषूत्पाद-व्ययध्रौव्यरूपेणास्तिनास्त्यवक्तव्यरूपेण। द्रव्यगुणपर्यायरूपेण, सप्तनयादिरूपेण च प्रकीर्णानि सन्ति। समन्तभद्र-सिद्धसेनादि (2-4 A.D.) जैनदार्शनिकैः सप्तभङ्गादिरूपेण तार्किकपद्धत्या तस्मै व्यवस्थितमेकं स्वरूपं प्रदत्तम्। ततश्चानेकैराचार्यैरेनमुद्दिश्य सुबहुवाङ्मयस्य रचना कृता, याद्यापि स्याद्वादस्य गौरवं प्रकटयति।

स्याद्वादस्यार्थः–

'परस्परं विरुद्धधर्माणां विवक्षावशान्मुख्यगौणत्वेन समन्वयः स्याद्वादः' अयमेव स्याद्वादस्यार्थः।[12] यथैकस्य न्यायाधीशस्य सूक्ष्मेक्षया निष्पक्षनिर्णयरूपं महत्त्वपूर्णं कार्यं, तथैव विभिन्नानां विचाराणां समन्वयार्थं तदेव कार्यं स्याद्वादस्य विद्यते।

स्याद्वादस्य व्युत्पत्तिः

स्याद्वादपदे 'स्यात्' 'वाद' पदयोस्संयोगः। तत्र स्याच्छब्दस्यार्थः– 'अपेक्षा', 'दृष्टिः' 'कथञ्चित्' वा, 'वाद'शब्दस्यार्थः–'सिद्धान्तः', 'मन्तव्यो' वाऽस्ति। द्वयोरपि शब्दयोः समुदितोऽर्थः 'सापेक्षसिद्धान्तः', सः सिद्धान्तः यत्रापेक्षावश्यकी भवति। 'अनेकान्तवादः', 'अपेक्षावादः', 'कथंञ्चिद्वादः', 'स्याद्वादश्चे' त्यादयोऽस्य नामान्तराणि अत्रानेकान्तवादे स्याद्वादे चायमेव सूक्ष्मो भेदो यदनेकान्तो वाच्योऽनेकधर्मात्मकोऽर्थः, स्याद्वादस्तु वाचकः तदभिव्यञ्जिकभाषापद्धतिः।

स्याद्वादस्य लक्षणम्

स्याद्वादस्य लक्षणं जैनाचार्यैः इत्थं कृतं विद्यते स्वापरेषु विचारेषु, मतेषु, वचनेषु, कार्येषु च तन्मूलकापेक्षानामवधानं 'स्याद्वादः, एतामेव परिभाषां स्पष्टयन्नमृतचन्द्रचार्यैरभिहितम्[13]–

एकेनाकर्षयन्ती श्लथयन्ती वस्तुतत्त्वमितरेण।
अन्ते जयति जैनी नीतिर्मन्थान-नेत्रमिव गोपी॥

आचार्यविद्यानन्दविरचिताष्टसहस्त्र्यामीदृशी परिभाषा विद्यते[14]– 'प्रत्यक्षादिप्रमाणाविरुद्धानेकात्मकवस्तुप्रतिपादकः श्रुतस्कन्धात्मको स्याद्वादः' इति। अस्य स्याद्वादस्यानेकान्तवादस्य वाभिव्यञ्जनाय जैनाचार्यैरेका पद्धतिर्निर्धारिता विद्यते, सा पद्धतिरेव 'सप्तभङ्गी' ति पदेन व्यवह्रियते।

सप्तभङ्गी

प्रश्नवशादेकत्रवस्तुन्यविरोधेन विधि-प्रतिषेधकल्पना सप्तभङ्गी।[15] अमृतचन्दाचार्यैः स्याद्वादाधिकारे प्रोक्तञ्च अथ द्रव्यस्यादेशवशेनोक्तां सप्तभङ्गीभवतारयामः (1) स्यादस्ति द्रव्यं (2) स्यान्नास्ति द्रव्यं (3) स्यादस्ति नास्ति च द्रव्यं (4) स्यादवक्तव्यं द्रव्यं (5) स्यादस्ति चावक्तव्यं च द्रव्यं (6) स्यान्नास्ति चावक्तव्यं च द्रव्यं (7) स्यादस्ति च नास्ति चावक्तव्यं च द्रव्यं इति। अत्र सर्वथात्वनिषेधकोऽनेकान्तद्योतकः कथञ्चिदर्थः स्याच्छब्दो निपातः। तत्र स्वद्रव्यक्षेत्रकालभावैरादिष्टमस्ति द्रव्यम्। परद्रव्यक्षेत्रकालभावैरादिष्टं नास्ति द्रव्यम्। स्वपरद्रव्यक्षेत्रकालभावैरादिष्टमस्ति च नास्ति च द्रव्यम्। स्वद्रव्यक्षेत्रकालभावैः परद्रव्यक्षेत्रकालभावैश्च युगपदादिष्टमवक्तव्यं द्रव्यम्। स्वद्रव्यक्षेत्रकालभावैः युगपत् स्वपरद्रव्यक्षेत्रकालभावैश्चादिष्टमस्ति चावक्तव्यं द्रव्यम्। परद्रव्यक्षेत्रकालभावैः युगपत् स्वपरद्रव्यक्षेत्रकालभावैः चादिष्टं नास्ति चावक्तव्यं द्रव्यम् स्वद्रव्यक्षेत्रकालभावैः परद्रव्यक्षेत्रकालभावैश्च युगपत् स्वपरद्रव्यक्षेत्रकाल-भावैश्चादिष्टमस्ति च नास्ति चावक्तव्यं च द्रव्यमिति।

यद्यपि अनेकान्तस्याद्वादसिद्धान्मुद्दिश्य शङ्कराचार्यमहोदयैर्यदालोचितं, तद्विषये भूतपूर्वप्रयागविश्वविद्यालयस्योपकुलपतिभिः डॉ. गङ्गानाथझा

महोदयैर्लिखितम्– 'यस्मात्कालान्मयाशङ्कराचार्यैविधत्तं जैनसिद्धान्तस्य खण्डनमधीतं, तस्मात्कालात् ममायं विश्वासः समुत्पन्नः, यदत्र बहु (ज्ञानं) वर्तते, यद् वेदान्तविज्ञैराचार्यैर्न सम्यग्ज्ञातम्। यच्चाद्यावधिपर्यन्तं मया जैनदर्शनज्ञानमर्जितं, तेनाहं दृढ़ेन विश्वासेन कथितुं शक्नोमि, यत् शङ्कराचार्यमहोदयैर्यद्यस्य मौलिकग्रन्थानामवलोकनाय कष्टः कृतःस्यात्तर्हि तेभ्योऽप्यत्र विरोधाय नावकाशः स्यात्।[14]

अनेकान्तस्य, स्याद्वादस्यः, सप्तभङ्गी च सिद्धांतः वस्तुस्वरूपस्य तथ्यरूपेण दिग्दर्शकः आत्मशक्त्या सह विश्वशान्तेरपि प्रतिष्ठापकः विद्यते। अस्मिन् सम्बन्धे सुप्रसिद्धो विद्वान् राष्ट्रकविः रामधारीसिंह दिनकरः कथ्यते :–

'नास्त्यत्र कश्चित् संदेहः यत् अनेकान्तस्यानुसंधानं भारतस्य अहिंसा साधनस्य चरमोत्कर्षम् विद्यते। तथा समस्तसंसारः यथाशीघ्रम् स्वीकरिष्यति चेत् विश्वे शान्तिरपि तथा शीघ्रम् स्थापिता भविष्यति'।[15] इत्यलम्।

सन्दर्भाः

1. समयसारात्मख्यातिटीका, अमृतचन्द्राचार्यविरचिता, परिशिष्टम्, प्रकाशकः- श्रीकुन्कुन्दतीर्थसुरक्षाट्रस्टः, जयपुरम्, संस्करणम्- दशम्।-1995, पृ. 648
2. अनेकान्त स्याद्वादश्च-डॉ. हुकमचन्दभारिल्लः, प्रका. टोडरमलस्मारकः, जयपुरम्, संस्करण 2004, पृ. 5-6
3. तदेव, पृ. 6-12
4. भट्टाकलंकदेवविरचिततत्त्वार्थराजवार्तिकः, प्रथमो खण्डः, सम्पा. डॉ. महेन्द्रकुमारन्यायाचार्यः, प्रथमोध्यायः, सूत्रं-6, वार्तिकं-7, प्रका. भारतीय ज्ञानपीठम् नवदेहली, संस्करण 2004, पृ. 35
5. समन्तभद्रग्रन्थावलिः, स्वयम्भूस्तोत्रम्, प्रका. वीरसेवामन्दिर, देहली, श्लोकः-103
6. स्याद्वादमञ्जरी-मल्लिषेणसूरिविरचिता, सम्पादकः-डॉ. जगदीशचन्द्र प्रका. -श्रीपरमश्रुतप्रभावकमण्डलम्, श्रीमद्राजचन्द्राश्रमम्, आगासः (गुजरातः) संस्क. 1992, कारिका-25, पृष्ठ-231
7. तदेव, टीका, पृष्ठ-231-232
8. न्यायसूत्रम्-1/2/10
9. राजवार्तिकम्, प्रथमोऽध्यायः, षष्ठसूत्रम्, वार्तिकाष्टमम्, पृ. 36
10. तदेव, नवमवार्तिकम्, पृ. 36

11. जैनेन्द्रसिद्धान्तकोशः, चतुर्थोभागः, प्रका. भारतीयज्ञानपीठम्, देहली
12. जैनदर्शन् आत्मद्रव्यविवेचनम्–डॉ. मुक्ताप्रसादपटेरिया, प्रका. प्राच्य विद्याशोधाकादमी, नई दिल्ली, सं. 1973, पृ. 90
13. समन्तभद्रग्रन्थावली, आप्तमीमांसा, कारिका-104
14. जैनदर्शने आत्मद्रव्यविवेचनम्–डॉ. मुक्ताप्रसादपटैरिया, पृ. 93
15. संस्कृति के चार अध्याय–रामधारीसिंहदिनकर, पृ. 137

सहायकग्रन्थाः

1. 'जैनदर्शन'–डॉ. महेन्द्रकुमारन्यायाचार्यः, प्रका. श्रीगणेशवर्णी दि. जैनशोधसंस्थानम्, वाराणसी
2. 'जैनधर्म : एकझलक'–डॉ. अनेकान्तकुमारजैनः, प्रका. शान्तिसागर स्मृतिग्रन्थमाला, (बुढ़ाना), मेरठम् (उ.प्र.)
3. 'जैनधर्म'–पं. कैलाशचन्द्रशास्त्रीः, प्रका. प्राच्यश्रमणभारती, मेरठम्
4. 'जैनदर्शन और अनेकान्त'–आचार्यमहाप्रज्ञः, प्रका. आदर्शसाहित्यसंस्थानम्, संस्क. 1994
5. 'अनेकान्त एवं स्याद्वाद विमर्श'–डॉ. रमेशचन्द्रजैनः, प्रका. आचार्य ज्ञानसागरवागर्थविमर्शकेन्द्रम्, व्यावरः (राजस्थानम्), 1996
6. 'जैनदर्शन में अनेकान्तवाद एक परिशीलन'–डॉ. अशोककुमारजैनः, प्रका. भगवानऋषभदेवग्रंथमाला, सांगानेरः, जयपुरम् (राज.), 2005

आप्तमीमांसायां स्याद्वादः

–प्रतापः*

आप्तमीमांसा इति नामधेयम् एकं ग्रन्थरत्नं जैनदर्शनस्य साहित्यम् अलङ्करोति। एतस्य ग्रन्थस्य अपरनाम देवागमस्तोत्रमपि वर्तते यतः एतस्य ग्रन्थस्य आरम्भ एव देवागमपदेन भवति। आप्तमीमांसा अर्थात् आप्तस्य मीमांसा सर्वज्ञस्य मीमांसा चेति। आप्तमीमांसाग्रन्थरत्नस्य ग्रन्थकर्तारः न्यायशास्त्रविशारदाः प्रकाण्डपण्डिताः समन्तभद्राचार्याः विलसन्ति। एतयोः उभयोः ग्रन्थग्रन्थकारयोः समयः द्वितीयातृतीयाशती वर्तते।

विक्रमस्य द्वितीयातृतीयाशताब्द्यां भारतवर्षस्य इतिहासे दार्शनिकक्रान्त्याः समयो आसीत्। एतस्मिन् समये विभिन्नदर्शनेषु अनेके क्रान्तिकारिणः विद्वांसः अभवन्। श्रमणपरम्परायां वैदिकपम्परायां च अश्वघोषः मातृचेटः नागार्जुनः कणादः गौतमः जैमिनिः एतादृशानां प्रतिद्वन्द्विनां विदुषां प्रादुर्भावः अभवत्। एते सर्वेऽपि प्रायः स्वमण्डने परखण्डने संलग्नाः जाताः यथा तत्र शास्त्रार्थानाम् आप्लावः आगतः। सद्वादः असद्वादः शाश्वतवाद उच्छेदवादः द्वैतवाद अद्वैतवादः वक्तव्यवाद अवक्तव्यवादः चेति। प्रायः एतानि चत्वरि विरोधीयुगलानि स्वीकृत्य एव तत्त्वचर्चा भवति स्म।

एतेषु चतुर्षु युगलेषु चतस्रः कोट्यः एवं प्रकारेण प्रयुज्यन्ते–

1. सदसद्वादः
    1. तत्त्वं सत् अस्ति।
    2. तत्त्वम् असत् अस्ति।
    3. तत्त्वम् उभयम् अस्ति।
    4. तत्त्वम् अनुभयम् अस्ति।

---

* जैनदर्शनाचार्यः, श्री ला.ब.शा.रा.सं.विद्यापीठम्, नवदेहली

2. शाश्वत–अशाश्वतवादः
    1. तत्त्वं शाश्वतमस्ति।
    2. तत्त्वम् अशाश्वतमस्ति।
    3. तत्त्वम् उभयमस्ति।
    4. तत्त्वम अनुभयमस्ति।
3. द्वैत–अद्वैतवादः
    1. तत्त्व द्वैतमस्ति।
    2. तत्त्वम् अद्वैतमस्ति।
    3. तत्त्वम् उभयमस्ति।
    4. तत्त्वम् अनुभयमस्ति।
4. वक्तव्यावक्तव्यवादः
    1. तत्त्वं वक्तव्यम् अस्ति।
    2. तत्त्वम् अवक्तव्यमस्ति।
    3. तत्त्वम् उभयमस्ति।
    4. तत्त्वम् अनुभयमस्ति।

समन्तभद्राचार्यैः प्रतिपादितं यत् तत्त्वम् उक्तासु चतसृषु कोटिसु एव समाप्तं न भवति। अपितु सप्तकोटिसु पूर्णं भवति। ते स्पष्टं कुर्वन्तिः यत् तत्त्वं तु अनेकान्तरूपं वतते, एकान्तरूपं नैव। वस्तुगतसप्तधर्माणां समुच्चयो अस्ति। एतादृशाः अनन्ताः सप्तधर्मा सागरे लहरी इव च लहरन्ति।

एकस्मिन् तत्त्वे एक धर्मः यदा उच्यते तदा अन्येषां धर्माणां तत्र विरोधो न भवति अपितु तेषां गौणता भवति। विवक्षया उत वा कथनापेक्षया एव एक धर्म मुख्यो एकश्च गौणो भवति। एतस्य सम्यक्ज्ञानार्थं प्रत्येकभङ्गेन सह स्यात् निपात योजनीयम् इत्युक्तं समन्तद्राचार्यैः। स्यात् पदस्यार्थो वर्तते कथञ्चित् कयाचिदपेक्षया कयाचित् दृष्टया इति।

आप्तमीमांसाग्रन्थे समन्तभद्राचार्यैः भावैकान्तस्य अभावैकान्तस्य उभयैकान्तस्य अवाच्यैकान्तस्य च अनेकान्तपल्लवितस्याद्पदेन खण्डनं कृतम्। अस्मिन् ग्रन्थे आचार्यैः स्याद्वादसिद्धान्तस्य विशदप्रतिष्ठापनं कृतम्।

ते स्पष्टं कृतवन्त: यत् कथं एकान्तवादे दोषा: वर्तन्ते कथञ्च तेषां निवारणं भवितुमर्हति तथा वर्ण्यते।

1. भावैकान्त:

भावैकान्तवादिन ये सन्ति ते पदार्थान् भावात्मकान् एव मन्यन्ते कस्यापि पदार्थस्य अभाव: नैव अङ्गीक्रियते। तै: एकस्मात् चतुर्विध अभाव: य: भवति तस्य विरोधो भवति। यदि अभावानां सत्ता न स्वीक्रियते तर्हि दोषा: उपस्थिता: भवन्ति। सर्वदा भावैकान्तं स्वीकुर्वन्ति चेत् चतुर्णाम् अभावानां कृते तु स्थानमेव न भवति। चत्वार: अभावा: सन्ति प्रागभाव: प्रध्वंसाभाव: अन्योन्याभाव: अत्यन्ताभाव: चेति।

वर्तमानपर्यायस्य पूर्वपर्याये अभाव एव प्रागभाव: उच्यते। एतम् अभावं न मन्यते चेत् कार्यात्मकद्रव्ये अनादित्वस्य प्रसङ्गो जायते।

भाविपर्याये वर्तमानपर्यायस्य अभाव एव प्रध्वंसाभाव: वर्तते। एतस्य अभावस्य अभाव स्वीकरणत्वात् कस्यापि द्रव्यस्य पर्ययस्य पदार्थस्य वा नाश एव न भविष्यति। द्रव्यस्य अनादित्वं भवति। कस्यापि द्रव्यस्य वर्तमानपर्याये समजातीयस्य अपरद्रव्यस्य अभाव यथा पुद्गलद्रव्यस्य वर्तमानावस्थायां अपरपुद्गलद्रव्यस्य वर्तमानपर्यायस्य अभाव: अन्योन्याभाव: उच्यते। एतस्य अभावस्य स्वीकरणं न भवेत् चेत् तेषाम् एकत्वप्रसङ्गो जायते।

एकस्मिन् द्रव्ये अपरद्रव्यस्य अभाव: अत्यन्ताभावो भवति, यथा पुद्गलद्रव्ये चेतनस्य अभाव: अत्यन्ताभाव:। एतस्य स्वीकरणं विना सर्वेषु पदार्थेषु एकत्वप्रसङ्गो जायते। भावैकान्ते सर्वदा एते दोषा: प्रत्युत्पन्ना: भवन्ति एव एतेषां दोषाणां निवारणार्थम् अनेकान्तदृष्ट्या चत्वार: अभावा: स्वीकरणीया: एव इति प्रतिपादितम् आचार्यै:।

2. अभावैकान्त:

भावैकान्ते दोषा: इति निश्चितं तदा अभावैकान्त स्वीकरणीय: किम्? सर्वे पदार्था: भावात्मका: इति मन्यते चेत् तेषां मते प्रमाणव्यवस्था अपि नैव उचिता प्रतीयते। तस्यामपि अभावस्य प्रसङ्गो भवति। यदा

प्रमाणस्यैव व्यवस्था न भवति तदा स्वमण्डनं परखण्डनञ्चापि कथं भवितुमर्हति। एतस्मात् अभावैकान्तोऽपि न समीचीन:।

3. उभयैकान्त:

अस्तु। भावैकान्त: न स्वीकरणीय अभावैकान्त: न स्वीकरणीय: तर्हि उभयैकान्त: स्वीकरणीय: किम्? नैव। उभयैकान्तपक्षं स्वीक्रियते चेत्। सोऽपि नास्ति विचारणीय। भावैकान्ते दोषा: अभावैकान्ते दोषा: तर्हि उभयैकान्ते अपि दोषा: भवन्त्येव। यत: एकान्तपक्षे सहानवस्थानविरोधं प्रत्यक्षमेव।

4. अवाच्यैकान्त:

त्रिषु एकान्तपक्षेषु दोषा सन्ति तदा यदि सर्वदा अवाच्यम् इति वदन्ति उत वा अवाच्यैकान्तस्य अवलम्बनं स्वीकृत्य वस्तुस्वरूपम् अवाच्यम् इत्यपि न वक्तुं शक्नुवन्ति।

एतेन प्रकारेण स्पष्टं जायते यत् भाव: अभाव: उभयम् अवाच्यञ्च एतानि चत्वारि अपि एकान्तदृष्ट्या न समीचीनानि। एतानि चत्वारि स्वीकृत्य अनेके समायान्ति। परन्तु यदि विधिप्रतिषेधे स्याद्वादनयेन विचार: क्रियते तर्हि कस्मै अपि दोषाय स्थानं न अवशिष्ट भवति। कोऽपि न कर्तुं शक्नोति विरोधो। स्याद्वादनयेनोच्यते यत् वस्तु कथञ्चित् भावस्वरूपम् कथञ्चित् अभावस्वरूपम् कथञ्चित् उभयस्वरूपम् कथञ्चित् अवाच्यम् कथञ्चित् भावाच्यम् कथञ्चित् अभावावाच्यम् कथञ्चित् भावाभावावाच्यञ्चेति।

एकान्तदृष्ट्या कस्यापि कथनं सत्यं प्रामाणिकञ्च न भवति तस्मात् स्याद्वाद: स्वीकरणीय: एव। यथा नित्यैकान्त: अनित्यैकान्त: सदेकान्त:, असदेकान्त: इत्यादीन् स्वीकृत्य अस्माकं कथनं वचनं सुव्यवस्थितं न भवति। स्याद्वाद एव विशदयति यत् पदार्थ कथं नित्यं कथञ्च अनित्यं वर्तते। कया दृष्ट्या सत् कया दृष्ट्या च असत् राजते। अन्तत: स्याद्वादस्य लक्षणमपि स्पष्टं करोति यत् अनेकान्तस्य कथनशैली स्याद्वाद:। स्याद्वादविषये आ तमीमांसायां सुन्दरमुक्तम्। तद्यथा–

कथञ्चित्ते सदेवेष्टं कथञ्चिदसदेव तत्।
तथोभयमवाच्यं च नययोगान्न सर्वथा॥ (आप्तमीमांसा 14)
स्याद्वादः सर्वथैकान्तत्यागात् किंवृत्तचिद्विधिः।
सप्तभङ्गनयापेक्षो हेयादेयविशेषकः। (आप्तमीमांसा 104)
भावैकान्ते पदार्थानामभावामपह्नवात्।
सर्वात्मकमनाद्यन्तमस्वरूपमतावकम्॥ (आप्तमीमासा 9)
कार्यद्रव्यमनादि स्यात्प्रागभावस्य निह्नवे। (आप्तमीमांसा 10)
प्रध्वंसस्य च धर्मस्य प्रच्यवेऽनन्ततां व्रजेत्।
सर्वात्मकं तदेकं स्यादन्यापोहव्यतिक्रमे।
अन्यत्र समवाये न व्यपदिश्येत सर्वदा। (आप्तमीमांसा 11)
अभावैकान्तपक्षेऽपि भावपह्नववादिनाम्।
बोधवाक्यं प्रमाणं न केन साधनदूषणम्। (आप्तमीमांसा 12)

धम्मविहीणो सोक्खं, तण्हाछेयं जलेण जह रहिदो।
तह इह वंछइ मूढो, णयरहिओ दव्वणिच्छित्ती॥
–समणसुत्तं, गाथा 692

जैसे धर्मविहीन मनुष्य सुख चाहता है या कोई जल के बिना अपनी प्यास बुझाना चाहता है, वैसे ही मूढ़जन नय के बिना द्रव्य के स्वरूप का निश्चय करना चाहते हैं।

विभिन्नक्षेत्रेषु स्याद्वादः

–सत्यवान्*

स्याद्वादः जैनदर्शनस्य सर्वाधिकं महत्त्वपूर्णं सिद्धान्तः वर्तते। अस्य विषयस्य अस्मिन् दर्शने तदेव स्थानं वर्तते यत् बौद्धमते 'प्रतीत्यसमुत्पादवादः' इत्यस्य तथा च वेदान्तदर्शन 'अद्वैतवाद' इत्यस्य वर्तते। कतिचन विद्वांसः स्याद्वादमेव संशयवादमपि कथयन्ति, परम् एतत् कथनं समीचीनं नास्ति। अत्र वयं स्याद्वादमतस्य समालोचनां कुर्मः।

विश्वे अनेके दार्शनिकमताः सन्ति। दार्शनिकाः विश्वस्य व्याख्यां विभिन्नप्रकारेण, विविधेषु सन्दर्भेषु कृतवन्तः। परम् अस्य अयम् आशयः नास्ति यत् कश्चित् असत्यः कश्चित् सत्यः इति। सर्वे दार्शनिकमताः विभिन्नदृष्टिकोणैः वर्तन्ते। अतः कस्यचित् मतस्य स्थापना अथवा खण्डने 'स्यात्' शब्दस्य प्रयोगः कर्तुं शक्यते।

स्याद्वादः कथयति यत् पदार्थेषु अनन्तधर्माणां सत्ता वर्तमाना वर्तते। अस्मिन् वयम् एकस्मिन् समये कतिचन धर्माणामेव ज्ञानं प्राप्तुं शक्नुमः, तथा च केषाञ्चित् प्रतिपादनं कर्तुं शक्नुमः। दार्शनिकं सत्यमपि केवलम् आंशिक अस्ति यतोहि पूर्णसत्यस्य उद्घाटनं कार्यं नितान्तं कठिनं वर्तते। अतः प्रसिद्धजैनाचार्यहेमचन्द्रसूर्यनुसारं स्याद्वादः सिद्धान्तो विविधाभिरपेक्षाभिः एकस्मिन्नेव वस्तूनि नित्यताऽनित्यतासदृशताविसदृशतावाच्यताऽवाच्यतासत्ता-प्रभृतिना परस्परं विरुद्धं प्रतीयमानानां धर्माणां प्रतिपादनं विधाय युक्तियुक्तं समन्वयं प्रस्तौति।

उपादव्ययध्रौव्ययुक्तं सत्–

जैनतार्किकपरम्परायां प्रत्येकं द्रव्यं सत्पदार्थो वा परिणामत्वात् एकं

* शोधछात्रः जैनदर्शनविभागे, श्री ला.ब.शा.रा.सं.विद्यापीठम्, नवदेहली

धर्मं विहाय द्वितीयं स्वीकुरुते। अनया प्रकृत्या प्रत्येकं सतः उत्पादः, व्ययः (विनाशः) च भवति। तथापि तस्य सत्पदार्थस्य स्वत्त्वं न विनश्यति।

तत्रोत्पादव्ययौ च सदैव सत्तां स्थापयतः। एतद् 'ध्रौव्यम्' इति कथ्यते। अनया विवेचनयेदं स्पष्टं भवति यदुत्पादव्ययाभ्यां सह सत्पदार्थे 'ध्रौव्य' नामकः तृतीयोऽपि धर्मः भवत्येव। यथा – मृत्तिकानिर्मितघटे विनष्टेऽपि मृत्तिकायाः सत्त्वं तिष्ठति। तथैव कस्यापि तत्त्स्य स्वरूपज्ञानार्थं तस्य अनेके धर्माः विचारणीयाः भवन्ति। अस्मादनेकधर्मत्वादेव किमपि वस्तु अनेकान्तत्वं प्राप्नोति। तदर्थं 'स्यात्' इत्यस्यापि प्रयोगो विधीयते यस्यार्थो भवति 'कथञ्चित्'।[2] अर्थात् तद्वस्तु तद्रूपत्वेन नहि अपितु भिन्नरूपत्त्वेन भवत्येव। अस्य सत्यस्याभिव्यक्तिरेव स्याद्वादः योऽथं पुनरप्यनेकान्तवादत्वेन व्यवहियते।[3]

अनेकान्तदृष्टौ प्रत्येकं वस्तु नित्यमनित्यञ्च, द्रव्यं नित्यं पर्चायमनित्यं यतोहि जविद्रव्यं विनाशता न सम्पद्यते। परं पदार्थाः परिवर्तनशीलाः। 'तत्त्वार्थसूत्रानुसारं'[4] प्रत्येकं सद्पदार्थः उत्पाद्-व्यय-ध्रौव्यात्मकश्चास्ति, अतः सः पर्यायेणोत्पद्यमानः विनयश्चयन् च द्रव्यवृत्त्या ध्रुवमस्ति। अत्र जैनमतानुसारं सत्पदार्थः न कदाचित् विनश्यति न वा असत् पदार्थः कदाचिदुत्पद्यत एव।[5] पूतेष्वनन्तधर्मेषु विधिनिषेधभावनया प्रत्येकं धर्मस्य साधुव्यवस्थापनाय सप्तभावनाः परिकल्पिताः एता एव सप्तभंगीनयत्वेन[6] व्यपदिश्यन्ते।

जैनदर्शनस्य सिद्धान्ताः न केवलं पारमार्थिकदृष्ट्या अपितु लौकिकदृष्ट्या अथवा व्यावहारिकदृष्ट्या अपि अत्यन्तम् उपादेयसिद्धं वर्तते। आधुनिकसमये धार्मिकं, सामाजिकम् इत्यादिषु क्षेत्रेषु अपि अनेकान्तस्य व्यावहारिकी उपयोगिता अस्ति अथवा नास्ति अस्मिन् क्षेत्रे एतत् सर्वं चिन्तनीयमस्ति।

आधुनिकयुगे व्यावहारिकतायाम् अत्यधिकं ध्यानं दत्तमस्ति। अद्य केवलं वैचारिकता उपयोगी नास्ति, यदा तदा तस्य व्यावहारिक उपयोगिता न स्यात्। अद्यतन प्रत्येकस्मिन् विषये व्यावहारिकतायाः दृष्टया समन्वयस्य

एवं सामञ्जस्यं अनिवार्यरूपेण आवश्यकं वर्तते। अनेन विना संसारस्य कस्यापि सम्पादनं कठिनं वर्तते।

येन प्रकारेण दिग्भ्रामितः पुरुषः दिशासूचकयन्त्रसहायतया गन्तव्यं प्रति गन्तुं शक्नोति, तेन एव प्रकारेण समन्वयस्य आधाररूपेण अद्यतन जीवने समस्यानां समाधानं कर्तुं शक्यते। अतः अनेकान्त समन्वयस्य प्रयोजनः दृढाधारः वर्तते। अस्मिन् दृढाधारः वर्तते। अस्मिन् परिप्रेक्ष्ये अनेकान्तस्य व्यावहारिकतायां विचारः कर्त्तव्यः।

(1) धार्मिकक्षेत्रे

प्राचीनसमये धार्मिककट्टरता अत्यधिक बलवती आसीत्। परस्परं सम्प्रदायेषु रागद्वेषस्य भावना, खण्डमण्डनयोः बहुलत्ता एवञ्च तीव्रसघर्षस्य सम्भावना अत्यधिका आसीत्।

किन्तु अधुना समयः परिवर्तितः। प्राचीनसमये एकराष्ट्रस्य भावना शिथिला आसीत् किन्तु अद्य एषा भावना सम्यक् सुदृढ़ा। अद्य वयं एकस्मिन् सम्प्रदायपुरुषा इव धर्मनिरपेक्षराष्ट्रे समूहरूपेण वसामः। भावनात्मएकता एवं सहिष्णुतायाः भावना वयं श्रद्धया एवं शान्तिरूपेण सम्पादयामः धर्मनिरपेक्षतायाः सिद्धान्तोऽपि मूलतः अस्य विषयस्य समर्थनं करोति यत् स्व-स्व भावनानुसारं प्रत्येकपुरुषः कस्यापि धर्मस्य अनुपालनं कर्तुं स्वतन्त्रः अस्ति अन्यदेशेषु अपि विभिन्न धार्मिकविचारकाः अनेकान्तवादी दृष्टिकोणस्य, भावनात्मक-एकतायाः तथा च समन्वयस्य भावनां विहाय एकस्मिन् समूहे स्थातुं नशक्नुवान्त।

(2) सामाजिकक्षेत्रे

समाजस्य मुख्यधारायां विभिन्नविचारकाः निवसन्ति। तेषां सामाजिकक्षेत्रे आवासः रूचिः, भोजनम् एवं भाषाः इत्यादि सर्वमपि भिन्नं भवति। तेषा पारम्परिक विभिन्नताः वर्तन्ते। एतासु विभिन्नतासु अपि मानवः समन्वयस्य एवं प्रेम्णा सामाजिकातायाः निर्वहणं करोति। विभिन्नतासु अपि एकतास्थापनं कार्यं अनेकान्तिकादृष्टिकोणणेन एव क्रियते। अतः समष्टिम् अस्य विषयस्य अंशानाम् अवगमनम्

आवश्यकमास्ति। यदि वयम् अंशानाम् उपेक्षां कुर्मः तर्हि: अन्शी वर्तते सः सर्वाङ्गम् एवं सम्पूर्णरूपेण अवगन्तुं न शक्नोति। सामान्यतः समाजे यः कलहः अथवा वाद-विवादः भवति, तत् सर्वं दुराग्रहिण, हतवादितायाः कारणेन, तथा च एकस्मिन् एव पक्षे स्थिरतत्त्वेन भवति। अनेन प्रकारेण एव आइ सटीनमहोदस्य सापेक्षावादोऽपि अस्य उपरि एव आधारिता वर्तते। अग्रे सगुणस्य निर्गुणस्य च, ज्ञानस्य भक्त्याः विवादं समीचीनं कृतमस्ति। इदं चिन्तनं वर्तमान सन्दर्भे अत्यधिकं सार्थकम् एवं प्रासङ्गिकञ्च अनुभूयते। एतादृशानां मूलप्रेरकसिद्धान्तानाम् आधारः अनेकान्तः एव वर्तते। अतः अनेकान्तदृष्टिकोणेन सामाजिकक्षेत्रे परस्परं सामाजिकं सौहार्दः, समरसता वर्धिष्यति।

(3) साहित्य-कला-संस्कृति-क्षेत्रे

अद्यतन वैचारिकतायाः क्षेत्रे, साहित्य कला संस्कृति क्षेत्रेऽपि अनेकान्तवादः अत्यधिकोपयोगीः एवञ्च सम्यक् दृष्टिप्रेरकः वर्तते। सहस्र वर्षपूर्वम् भगवान् महावीरः नयपद्धतिमाध्यमेन अपेक्षाभङ्ग इत्यस्मिन् विषये गूढाध्ययनं कृतवानासीत्। यदि अद्यतन समाजनीतिः राजनीतिः इत्यादि विषयेषु स्वीक्रयते महात्मा गान्धीमहोदय वदति तेनप्रकारेण प्रत्येकमानवः स्वे स्वे कर्मव्याभिरतः भूत्वा योग कर्मसु कौशलम् इत्यस्य अनुशरणं काईष्यति। मनोविश्लेषण शास्त्रस्य आचार्याः जानान्ति यत् पूर्वाग्रहः मनोरोगः इव वर्तते। किञ्चिदापि ज्ञानं विकसितंन भवति यत्र ज्ञानं नास्ति, तत्र सृजनं कथं शक्यते? एतादृशी दिशायां विभिन्नप्रकारेण प्रेरणा प्राप्यते। तद् अस्मान् अवक्तव्यम्। पर्यन्तं मानवीयकल्पनां नयति।

अनेन प्रकारेण साहित्य-कला-संस्कृति-क्षेत्रे अपि अनेकान्तस्य आधुनिकतायाः सन्दर्भे उपयोगिता सिद्धिं याति।

(4) अन्तर्राष्ट्रियक्षेत्रे

मानवविकासस्य इतिहासः अस्य साक्ष्यं करोति यत् विज्ञानेन अस्त्र शस्त्रणां सम्यक् निर्माणं कृतमस्ति। मानवेन निहितस्वार्थवश तेषां (अस्त्र शास्त्राणां) निर्ममतया प्रयोगः कृतः। फलस्वरूपं संहारकदृश्यं

सर्वत्र दृश्यते। विश्वस्य प्रथमम् एवं द्वितीयं महायुद्धम् अस्य ज्वलन्तं प्रमाणं वर्तते। मानवमनसा संहारकशास्त्रैः त्रस्तः भूत्वा पारस्परिक सहानुभूत्याः सह अस्तित्वम् इत्यादिषु आधारिकृत्य तेन शान्ति स्थापिता। अतः एतत् निश्चितमस्ति यत् आहिंसया सम्पादितविजयः स्थायी एवं शाश्वतः वर्तत्ते। वैचारिक आहिंसायाः नाम एव अनेकान्तः वर्तते।

अनेकान्तः विश्वनागरिकतायाः मूलाधारः वर्तते। अहिंसामाध्यमेन एव अस्तित्वं शक्यते, अन्य कश्चित् उपायः नास्ति अत्र विषयद्वयमपि विश्वसनीयौ स्तः। अयं विश्वासः परिवारस्य, समाजस्य, राष्ट्रस्य अस्मिन् एव क्रमे सम्पूर्ण विश्वस्य पारम्परिकसद्भावस्य स्नेहस्य तथा च योगस्य अपि आधारः वर्तते। एते द्वे तत्त्वे संगच्छध्वम् संवदध्वम् इत्यनयोः ध्वनिं सर्वत्र प्रसारयाति। अतः अद्य सम्पूर्णविश्वः सजगः, सतर्कः वर्तते।

आचार्यसिद्धसेनस्य कथनानुसारं त्रयाणां लोकानाम् अद्वतीयः विषयः अनेकान्तवादः–

जेण विणा लोयस्स वि विवहारो सव्वहा ण णिव्वहइ।
तस्य भुवणेक्कगुरुणो णमो अणेगंतवायस्स॥

निष्कर्षरूपेण वक्तुं शक्यते यत् अनेकान्तः तथा च स्याद्वादः विजयद्वयमपि व्यावहारिकजीवने सर्वदा वर्तते।

सन्दर्भ

1. अन्ययोगव्यवच्छेदद्वात्रिंशिका, श्लोकः 25।
2. मोहनलाल मेहता, जैन धर्मदर्शन पृ. 385
3. लघीयस्त्रय टीका, पृ. 62
4. तत्त्वार्थसूत्रम् 5
5. पञ्चास्तिकाय 15
6. आचाराङ्ग 10.10.6

जैनदर्शने स्याद्वादस्य विमर्शः

–दीपककुमारद्विवेदी *

भारतीयदर्शनशास्त्रे प्रत्येकदर्शनस्येकः सिद्धान्तः, तस्मिन् तदात्मनिर्भरो स भवति। यथा सांख्ययोगयोः सत्कार्यवादो, न्यायेऽसत्कार्यवादः वेदान्ते विवर्त्तवादः, चार्वाके देहात्मवादः, बौद्धे शून्यवादश्च प्रसिद्धाः सन्ति तथैव जैनदर्शनेऽपिः स्याद्वादसिद्धन्तः यावत्पदार्थस्य गुणावगुणयोः विषये सम्यग्ज्ञानं न प्राप्यते तावत् तस्य सत्स्वरूपस्य ज्ञानं नैव कर्तुं शक्यते।

जैनवाङ्मयस्य दार्शनिकक्षेत्रे सप्तभङ्गीवादस्यास्य विस्तारयितुं श्रेयं प्राप्यते समन्तभद्राचार्यम्। स आप्तमीमांसाग्रन्थे स्वकालीनसदैकान्तवादी सांख्याचार्यः, अवाच्यैकान्तवादीबौद्धानां, दुराग्रहवादस्य निराकरणं विहाय, प्रमुखचतुर्भङ्गानां प्रयोगः कृतवान् शेषत्रयभङ्गानामुपयोगस्य कृते सङ्केतमात्रं तेन दत्तम् स्वामीसमन्तभद्राचार्येण स्वसुप्रसिद्धग्रन्थे देवागमस्तोत्रे स्याद्वादस्य अत्यन्तं शोभनं लक्षणं कृतम्–

स्याद्वादः सर्वथैकान्तत्यागात् किंवृत्तचिद्विधिः।
सप्तभंगनयापेक्षो, हेयादेयविशेषकः॥104॥[1]

आप्तमीमासायां अष्टशतीभाष्यकारेण श्रीअकलङ्कदेवेन विधानम् इत्थं कृतम्–शङ्कराचार्यस्य अनिवर्चनीयवादः सदवक्तव्यं, बौद्धानाम् अपोहवादः असदवक्तव्यं, योगस्य पदार्थवादः सदसदवक्तव्यकोट्यां सम्मिलितो भवति। **स्याद्वादः**–स्याद्वादः ज्ञानस्य सापेक्षताया सिद्धान्तः, स्यात् पदस्यार्थः सम्भवतः संशयश्च नास्ति। परं जैनदर्शने 'स्यात्' शब्दस्य प्रयोगो विशेषार्थेऽभवत् यः ज्ञानस्य सापेक्षतायाः सूचकः। यावत्स्यात् पदस्य सुष्ठुरूपेण ज्ञानं न भवति

---

* शोधछात्रः न्यायविभागे, श्री ला.ब.शा.रा.सं.विद्यापीठम्, नवदेहली

तावच्चास्य विशेषतां न ज्ञातुं शक्यते? अत एव कस्यापि सिद्धान्तस्य मूलतत्त्वज्ञानार्थं सात्त्विकज्ञानमावश्मकम्। विरोधीदार्शनिका: 'स्यात्' इति पदस्य सम्यगर्थं न कृत्वा भ्रान्तिवशात्शायदवाद: संशयवाद: सम्भवनावाद: इत्यादय: अनेकानि रूपाणि प्रस्तुवन्ति स्यात्पदं न तिङ्गतं सन्देहवाचकञ्च, इदं निपात: एकस्या निश्चितापेक्षाया: वाचक:। तार्किकचूड़ामणिसमन्तभद्रेण निगदितम्–

वाक्येष्वनेकान्तद्योती गम्यं प्रति विशेषणम्।
स्यान्निपातोऽर्थयोगित्वात् तव केवलिनामपि।।[2]

आचार्यसमन्तभद्र: स्याद्वादं केवलज्ञानसमं सर्वतत्त्वप्रकाशको मन्यते तत्र प्रत्यक्षपरोक्षविषयको केवलं भेद:।[3]

भारतीयदर्शने स्याद्वाद:–भारतीयदर्शनस्य मुख्यं लक्ष्यं मोक्षप्राप्ति:। सर्वे दार्शनिका: स्व स्वविवेकानुसारं स्वसिद्धान्त: प्रसारित: परञ्च लक्ष्यमेकमेवास्ति। न्यायसूत्र– भाष्यकार: महर्षिवात्स्यायन: भाष्ये लिखितवान् नानुपलब्धेऽर्थे न निर्णीतेऽर्थे न्याय: प्रवर्तते किं तर्हि संशयेऽर्थे प्रयुक्तो भवति, तर्कभाषाकारेण केशवमिश्रेण वर्णितम् 'एकस्मिन्धर्मिणि विरुद्धनानाधर्म वैशिष्ट्यावगाहि ज्ञानं संशय: स्थाणुर्वा पुरुषो वा'। अत्रापि अस्ति नास्ति इत्थंमभयात्मकं ज्ञानं भवति। वैदिकसाहित्येऽपि स्याद्वादसिद्धान्तस्य अस्तित्त्वं जैनाचार्य–महावीरस्य पूर्वं प्रमाणितं भवति स्म। ऋग्वेदस्य नासदीयसूक्ते सृष्ट्या: ब्राह्मणं सत्सत् भिन्नं वर्णनं कृत्वा अन्यत्र सत् कथयति कस्मिन्स्थाने अतस्तदपि एकस्मिन् पदार्थे उभयात्मकं धर्मा उत्पद्यन्ते। किन्तु अस्य उपपत्ति: अपेक्षावादस्यानुसारं सम्यग्प्रकारेण भवति। अत एव स्पष्टं भवति वैदिककालेऽपि स्याद्वादस्य प्रचारोऽभवत्। उपाध्याययशोविजयस्य निम्नवाक्येन अस्य विषयस्य पुष्टि: भवति–

ब्रुवाणा भिन्नभिन्नार्थान् नयभेदव्यपेक्षया।
प्रतिक्षिपेयुर्नो वेदा: स्याद्वादं सार्वतांत्रिकम्।। (नयोपनिषद्)

मध्यकालीनदार्शनिकग्रन्थेषु स्याद्वादस्यालोचना मिलति महाभारतस्य टीकाकार: उल्लेखं करोति–

''सर्वं संशयितमति स्याद्वादिनः सप्तभङ्गीनयज्ञाः''

अत एव सिद्ध्यते स्याद्वादोऽत्यन्तः प्राचीनः सिद्धान्तः। बौद्धसाहित्येऽपि दीर्घनिकायसमञ्जफलसत्तग्रन्थे उल्लेखं मिलति बौद्धमतप्रवर्तकः संजयवैरत्थी आसीत् तस्य सिद्धान्तः स्याद्वादस्य विकृतरूपः।।[5]

वास्तविकरूपेण स्याद्वादसिद्धान्तः जैनदर्शने महावीरमुनेः प्राचीनः। ज्रीसमन्तभद्रादिजैनाचार्याः इमं विस्तृतं कृतवन्तः। भगवता महावीरस्वामिना स्वानुपमैः विलक्षणवचनैः पूर्णसत्यस्य उपदेशं प्रदत्तं तेषामुपदेशः संसारसागरेऽस्मिन् 'श्रुत' नाम्ना प्रख्यातोऽभवत्। उपदेशस्यास्य प्रत्येकं वाक्यं 'स्यात्' कथंचित् वा कापि अपेक्षया माध्यमे नाभवत् यतोहि तेन विना सम्पूर्णसत्यस्य प्रकाशनं न भवितु शक्नोति अत एव उपदेशं 'श्रुत इदमेव समन्तभद्राचार्येण स्याद्वादनाम्ना सम्बोधितम्-

स्याद्वादकेवलज्ञाने वस्तुतत्त्वप्रकाशने।
भेदः साक्षादसाक्षाच्च ह्यवस्त्वन्यतमं भवेत्।।(आप्तमीमांसा)

सप्तप्रकाराणां भंगानां समूहः सप्तभङ्गी नाम्ना विख्यातोऽस्ति। ऐषां सप्तवाक्यानां मूलं विधिः प्रतिषेधश्चास्ति। आधुनिकविदुषः इमानि विधिप्रति-षेधपद्धतिनाम्ना प्रकाश्यन्ते।[6]

सम्पूर्णजैनवाङ्मये आचार्यकुन्दकुन्दस्य पञ्चास्तिकाये प्रवचनसारे च सर्वप्रथमं सप्तभङ्गानामुल्लेखं प्राप्यते। अन्यदर्शनेषु अनेकान्तवादसमर्थकः अनेकविचारः प्राप्यते। अत एव एतद् असत्, उभय, अनिर्वचनीय भङ्गानामाशयः पृथग्रूपेण वैदिकदर्शनेष्वपि दृष्टिगोचरो भवति बौद्धदर्शने तु अनेकेषु स्थानेषु सत्, असत् उभयानुभयानाम् उल्लखो मिलति-

न सन्नासन्न सदसन्न चाप्यनुभयात्मकम्।
चतुष्कोटिविनिर्मुक्तः तत्त्वं माध्यमिका विदुः।।[7]

यथा न्यायवैशेषिक-सांख्ययोग-वेदान्त-दर्शनेषु चतुर्थपुरुषार्थप्राप्त्यर्थं स्ववादः तथैव नयः, उपनयः, स्याद्वादः अनेकान्तपद्धतिः सप्तभङ्गी इत्यादिभिः श्रुतज्ञानस्य आराधनार्थं मोक्षपुरुषार्थस्य मूलमस्ति। स्याद्वादानेकान्तवादयोः च

इतिहासानाद्यस्ति एकान्तस्य विषयः सनातनः अनेकान्तस्य क्षेत्र व्यापकः। अनेकान्तः वाच्यः, स्याद्वादो वाचकः। एकस्मिन् वस्तुनि अनेकविधिनिषेधानां कल्पना सप्तभङ्गी अस्ति।

स्वद्रव्यक्षेत्रकालभावेन घटोऽस्ति इति कथ्यते एवञ्च परद्रव्यक्षेत्र कालभावेन घटस्य नास्ति इति विरुद्धार्थोत्पद्यते अनेकान्तात्मकार्थकथन[8] स्याद्वादः'' प्रत्येकपदार्थेऽनन्तगुणविद्यमानाः सन्ति। अत्र अनेकस्यार्थः अनन्तः अनन्तस्य अर्थः गुणधर्मश्च भवति। अनन्तगुणात्मकपदार्थः एव अनेकान्तः स्याद्वादः सर्वेषां पदार्थानां स्वरूपसिद्धकारकः अर्हन्तसर्वज्ञस्य निर्बाधनियमः। स्याद्वादः प्रोच्यते अनेकान्तस्वभावयुक्ताः पदार्थाः सम्पूर्णपदार्थानेकात्मकाः[9] इत्थं पदार्थे वस्तुतत्त्वं उत्पादकः परस्परविरुद्धशक्त्योः प्रकाशनम् अनेकान्तः।

अनेकान्तोऽप्यनेकान्तः प्रमाणनयसाधनः।
अनेकान्तः प्रमाणात्ते तदेकान्तोऽर्पितान्नयात्॥[10]

एवं वयं पश्यामः यदनेकान्तः स्याद्वादतः जैनदर्शनस्य तादृशो विषयः यं विषयं परिज्ञानमन्तरा जैनदर्शनं दुर्बोध्यं। अत एव जैनदर्शनविषये प्रवेशार्थं प्रकृतविषयस्य गम्भीरतया ज्ञानमपेक्षितं तत्र प्रयत्नं विधेयम्।

उपसंहार

एकस्मिन् वस्तुनि केवलं एका सत्ता प्रादुर्भवति इत्थं न वक्तुं शक्यते। स्वद्रव्यक्षेत्रकालभावेन अस्ति नास्ति रूपे प्राप्यते। वस्तुनः धर्मस्य ज्ञानमधर्मज्ञानं विना न भवति मम दृष्ट्या घटोऽस्ति, अन्येषां दृष्ट्यां घटो नास्ति प्रथक् ज्ञानं भवति।

इतरदर्शनवाङ्मये स्याद्वादसिद्धान्तस्य उल्लेखं तु न मिलति किन्तु वैदिकावैदिकदर्शनयोः पर्यायरूपे दृश्यते। स्याद्वादः अपेक्षावादस्य सिद्धान्तः सदसत्भावविरोधीधर्माणां समन्वयः एव जैनदर्शनस्य स्याद्वादः अनेकवादः। अस्य मतानुसारं वस्तुः अनन्तस्वरूपयुक्तम् अनन्तधर्मसमाविष्टः कस्यापि पदार्थस्य एकरूपता सर्वथासम्भवा।

पदार्थस्य यथार्थस्वरूपनिर्णयार्थं स्याद्वादस्य उपयोगः सर्वप्रथमः। जैनदर्शनस्य स्याद्वादभास्करस्य मयूखैः सर्वाणि दर्शनानि निर्बाधरूपेण

प्रकाशितानि सन्ति। स्याद्वादः आत्मशान्त्या सह विश्वशान्तेः प्रतिष्ठापक-सिद्धान्तः।

सन्दर्भ

1. शेषभङ्गाश्च नेतव्या यथोक्तनययोगतः। –आप्तमीमांसा श्लोक 104
2. आप्तमीमांसा, श्लोक 103
3. स्याद्वादकेवलज्ञाने सर्वतत्वप्रकाशने।
   भेदः साक्षादसाक्षाच्च ह्यवस्त्वन्यतमं भवेत्।। –आप्तमीमांसा
4. दर्शन अनेकान्तवादः, पृष्ठ-133-135
5. महाभारत 2/2/33-36
6. (1) विधिकल्पना (2) प्रतिषेधकल्पना (3) क्रमतो विधिप्रतिषेधकल्पना (4) सह विधिप्रतिषेधकल्पना (5) विधिकल्पना सह विधिप्रतिषेधकल्पना (6) प्रतिषेधकल्पना सह विधि प्रतिषेध कल्पना।
7. क्रमाक्रमाभ्यां विधिप्रतिषेध कल्पना। अष्टसहस्त्री पृ.-7 नागार्जुन विरचितः माध्यमिकरिका।
8. लघीयस्त्रयीटीका।
9. स्याद्वादो हि समस्तवस्तुतत्त्वसाधकमेकमस्खलितं शासनमर्हत्सर्वज्ञस्य सर्वमने-कांतात्मकमित्यनुशास्ति तत्र यदेव तत्तदेवातत्, यदेवैकं तदेवानेकं यदेव सत्तदेवासत् यदेव नित्यं तदेवानित्यमित्येकवस्तुवस्तुत्वनिष्पादकः।
10. आचार्य समन्तभद्र, स्वयंभूस्तोत्रम्, श्लोक-103

शास्त्र ज्ञान का महत्त्व

सूई जहा ससुत्ता, न नस्सई कयवरम्मि पडिआ वि।
जीवो वि तह ससुत्तो, न नस्सइ गओ वि संसारे।।

जैसे धागा पिरोयी हुई सुई कचरे मे गिर जाने पर भी खोती नहीं है, वैसे ही ससूत्र अर्थात् शास्त्रज्ञानयुक्त जीव संसार में पड़कर नष्ट नहीं होता।

–समणसुत्तं, 248

अनेकान्त की व्यापकता

–प्रो. दयानन्द भार्गव*

अनेकान्त और अनेकान्तवाद–

1. सर्वप्रथम मैं अनेकान्त और अनेकान्तवाद में अन्तर करना चाहता हूँ। मेरा ऐसा करने का आधार श्रीमद्‌भगवद्‌गीता है जिसमें वेद तथा वेदवाद शब्दों का प्रयोग दो भिन्न अर्थों में किया गया है। श्रीकृष्ण कहते हैं–

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः।
वेदवादरताः पार्थ! नान्यदस्तीति वादिनः।।

कामात्मनः जन्मकर्मफलप्रदाम्।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति।।

भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम्।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते।।

स्पष्ट है कि यहाँ 'वेदवाद' 'रत' लोगों की यह कहकर निन्दा की गयी है कि वे यह कहा करते हैं कि 'नान्यदस्ति' 'इसके अतिरिक्त और कुछ भी नहीं है। 'इसके अतिरिक्त और कुछ भी नहीं है'– यह जैन परम्परा के 'एव' की ही व्याख्या है। जैनविद्या के अध्येताओं के बीच कहने की आवश्यकता नहीं है कि 'एव' एकान्त का सूचक है। जब कोई वैदिक धर्मावलम्बी यह कहता है कि वेद ही सब कुछ है, वेद के अतिरिक्त और कुछ भी नहीं है, तो वह समाधि को प्राप्त नहीं कर

* पीठाधीश, मधुसूदन ओझा वेद विज्ञान पीठ, श्री रा. ज. राजस्थान संस्कृत विश्वविद्यालय, जयपुर

सकता। यह वेद के प्रति एकान्त दृष्टि रखने का परिणाम है। अभिप्राय यह है कि वेद अपराविद्या है। वह स्वर्ग की प्राप्ति का साधन तो है किन्तु यह कहना ठीक नहीं कि वेद के अतिरिक्त और कुछ नहीं है; क्योंकि यदि वेद अपराविद्या है तो उसके अतिरिक्त एक पराविद्या भी है जिसके द्वारा अक्षर तत्त्व का अधिगम होता है–

अथ परा यया तदक्षरमधिगम्यते।

अर्थात् वेद एक अपेक्षा से सार्थक है किन्तु दूसरी एक ऐसी अपेक्षा भी है जहाँ वेद की गति नहीं है। वह क्षेत्र पराविद्या का है। इसी बात को गीता में **'त्रैगुण्यविषया वेदाः नैस्त्रैगुण्यो भवार्जुन (2.45)** कहकर प्रकट किया गया है। यह तो एक अपेक्षा से वेद की सीमा हुई, दूसरी अपेक्षा से वेद के प्रशंसापरक वाक्य भी गीता में ही उपलब्ध हो जायेंगे **प्रणवः वेद्यः (15.15)** इत्यादि। निष्कर्ष यह हुआ कि जहाँ वेद की सीमा बतायी गयी वहाँ 'वेदवाद' शब्द का प्रयोग है किन्तु जहाँ वेद की प्रंशसा की गयी है वहाँ 'वेदवाद' के स्थान पर केवल 'वेद' शब्द का प्रयोग है। इस आधार पर मैं कहना चाहता हूँ कि जहाँ तक अनेकान्तवाद का प्रश्न है, वह वाद है, एक दर्शन है, एक दृष्टि है। उस दर्शन को हम आज जैनदर्शन के नाम से जानते हैं। स्वाभाविक है कि यदि जैनदर्शन एक दर्शन है तो वेदान्त, बौद्ध आदि अन्य दर्शन भी हैं जिनका जैनदर्शन से मतभेद है। अतः वे दर्शन अनेकान्तवाद को स्वीकार नहीं करेंगे। यदि वे भी अनेकान्तवाद को स्वीकार कर लें तो उनका अस्तित्व ही समाप्त हो जायेगा, वे तो जैनदर्शन में ही[3] विलीन हो जायेंगे। अतः अनेकान्तवाद की स्वीकार्यता सीमित ही है। वह अधिक से अधिक वस्तुवादी दर्शनों (Realist Systems) को स्वीकार हो सकता है। जैसा कि पूर्व मीमांसा को स्वीकार है भी किन्तु प्रत्ययवादी (Idealist Systems) दर्शन उसे स्वीकार नहीं कर सकते जैसा कि वेदान्त और बौद्ध उसे स्वीकार नहीं करते है। यही अनेकान्तवाद की सीमा है; वह वस्तुवादियों को स्वीकार्य है, प्रत्ययवादियों को स्वीकार्य नहीं है। किन्तु यदि अनेकान्त को एक वाद बना कर उसे विवाद का विषय न बनायें, (तुलनीय–गीता (10.32) वादो विवदतामहम्) तो अनेकान्त की स्वीकार्यता

सर्वव्यापक हो सकती है। अतः हम 'अनेकान्तवाद' पर विचार न करके प्रस्तुत पत्र में यह विचार करेंगे कि 'अनेकान्त' की सर्वव्यापकता तथा सर्वदर्शनस्वीकार्यता कैसे बनती है। वाद के रूप में तो किसी भी सिद्धान्त की स्वीकार्यता सीमित हो सकती है। वाद का स्वरूप ही ऐसा है कि वह एकपक्षीय ही होता है।

वेदान्त और अनेकान्त

2. 'नैकस्मिन्नसम्भवात्' (ब्रह्मसूत्र) की व्याख्या करते समय आचार्य शंकर ने अनेकान्तवाद का खण्डन किया है। उनका कहना है कि एक में परस्पर विरोधी दो धर्म नहीं रह सकते, अतः अनेकान्तवाद समीचीन नहीं है। इस पर अनेक जैन तथा जैनेतर विद्वानों का कहना है कि आचार्य शंकर अनेकान्तवाद को ठीक से समझे नहीं। मेरा मानना है कि आचार्य शंकर ने अनेकान्तवाद को ठीक से समझकर ही उसका खण्डन किया है। वे अद्वैतवादी हैं। उनके अद्वैतवाद का आधार निरपेक्षता है जबकि अनेकान्तवाद का आधार सापेक्षता है; सापेक्षता सदा अनेकों में हो सकती है, एक में तो निरपेक्षता ही होती है। जब श्रुति का घोष है कि 'नेह नानास्ति किंचन' तो इस श्रुति का अनेकान्तवाद से कैसे मेल हो सकता है? अतः अद्वैतवादी शंकराचार्य ने अनेकान्तवाद को समझकर ही उसका खण्डन किया है; यह कहना ठीक नहीं है कि आचार्य शंकर अनेकान्तवाद को समझे नहीं थे। आगम-प्रमाण को मानने वाले किसी भी ऐसे तर्क को स्वीकार नहीं कर सकते थे जो तर्क आगम के विरुद्ध जाये। शंकराचार्य की यही स्थिति है। वे श्रुति को अद्वैतवादी मानते थे और अनेकान्तवाद से द्वैतवाद सिद्ध हो जाता है। फिर शंकराचार्य अनेकान्तवाद को कैसे स्वीकार करते? इस पर यह आरोप आ सकता है कि श्रुति तर्कविरुद्ध है। उत्तर यह है कि तर्क दोनों प्रकार का सम्भव है-श्रुतिविरुद्ध तर्क भी है तथा श्रुतिसम्मत तर्क भी है। उसे श्रुतिसम्मत तर्क की खोज करनी चाहिए-**श्रुतिमतस्तर्कोऽनुसन्धीयताम्।**

दो प्रकार के तर्क

3. डाक्टर सतकड़ि मुखर्जी ने दो प्रकार के तर्कों का उल्लेख

किया है। एक शुद्ध तर्क है जो अनुभवनिरपेक्ष है, दूसरा अनुभवसापेक्ष तर्क है। उदाहरणार्थ हम दो वाक्य लें–

1. गुलाबी रंग लाल रंग से हल्का होता है।

2. यज्ञदत्त देवदत्त से कद में छोटा है।

इसमें पहला वाक्य अनुभवनिरपेक्ष है। गुलाबी रंग का लक्षण ही है कि वह लाल रंग से हल्का होता है। अतः गुलाबी रंग लाल से हल्का होता है–यह सिद्ध करने के लिए लाल रंग और गुलाबी रंग का अनुभव करने की आवश्यकता नहीं है। यदि कोई यह कहे कि गुलाबी रंग लाल रंग से गहरा होता है तो उसका यह कथन अनुभव किये बिना ही अप्रमाणिक माना जा सकता है। उसे यह कहने की आवश्यकता नहीं है कि पहले हम गुलाबी रंग और लाल रंग को देखेंगे फिर बतायेंगे कि तुम्हारा कथन सत्य है या नहीं। यह अनुभवनिरपेक्ष तर्क की स्थिति है। इसे a prori Logic कहते हैं। किन्तु उपरिलिखित दूसरे वाक्य की प्रामाणिकता को जानने के लिए यज्ञदत्त को देखना आवश्यक है। यज्ञदत्त और देवदत्त शब्दों में स्वयं में कोई ऐसा चिन्ह नहीं है कि बिना यज्ञदत्त को देखे यह बताया जा सके कि उनमें कौन कद में छोटा है और कौन कद में बड़ा है। अतः इस वाक्य की सत्यता अनुभवसापेक्ष तर्क से सिद्ध होगी। शंकराचार्य का यह कहना है कि 'कोई पदार्थ है भी नहीं भी' इस की सत्यता को जानने के लिए अनुभव की आवश्यकता नहीं है। अस्ति नास्ति का व्यावर्तक है और नास्ति अस्ति का व्यावर्तक है। अतः जैन जिस अनुभव के आधार पर अस्ति और नास्ति का एक ही पदार्थ में युगपद् होना मान रहा है उस अनुभव की अपेक्षा किये बिना ही हम यह कह सकते हैं कि अस्ति और नास्ति परस्पर विरुद्ध धर्म हैं और वे एक में युगपद् नहीं रह सकते। अतः अनेकान्तवाद समीचीन नहीं है। इसके विरुद्ध जैनों का कहना है कि सभी तर्क अनुभव से सिद्ध होते हैं। हम अनुभव से ही तो यह जानते हैं कि कोई पदार्थ या तो होता है या नहीं होता है। इसी आधार पर हम अस्तित्व और नास्तित्व को परस्पर विरुद्ध मानते हैं। किन्तु यदि हमें अनुभव से यह पता चले कि कोई

पदार्थ अपने द्रव्य, क्षेत्र, काल, भाव से होता है और दूसरे द्रव्य, क्षेत्र काल, भाव से नहीं होता तो हमें यह मानना होगा कि पदार्थ स्वचतुष्टय से होता है और परचतुष्टय से नहीं होता।

इस प्रकार अनेकान्तवाद एक ही पदार्थ का एक अपेक्षा से अस्तित्व और दूसरी अपेक्षा से नास्तित्व मानता है। इस के विपरीत वेदान्ती व्यवहार में जैन के तर्क से सहमत होते हुए भी परमार्थ में जैन के तर्क से सहमत नहीं है। उसका कहना है कि जैन के अनुभव में जो सापेक्षता की दृष्टि से विरुद्ध धर्मों का युगपद् एक में रहना सिद्ध हो रहा है उसी के आधार पर हम भी संसार में व्यवहार करते हैं। अतः व्यवहार में अनेकान्त को स्वीकार किया जा सकता है इसीलिए हम माया को सदसदनिर्वचनीय मानते हैं। इसमें जैन की सप्तभंगी के तीन मूल भंग समाविष्ट हैं। माया प्रतीति में आती है अतः वह सत् है किन्तु वह विलीन हो जाती है इसलिए असद् है और क्योंकि सद् असद् युगपद् नहीं रहते इसलिए माया अननिर्वचनीय है– **'तदेव मायाया मायात्वं यत्तर्कासहिष्णुत्वम्'**। तर्क की कसौटी पर माया को नहीं कसा जा सकता क्योंकि तर्क की माँग है कि माया या तो सत् हो या असत् किन्तु यह दोनों है अतः इसे तर्क की कसौटी पर नहीं कस सकते। जैन का कहना है कि वेदान्ती जिसे असत् कह रहा है वह परिवर्तन अर्थात् उत्पाद-व्यय है और जिसे वह सत् कह रहा है वह ध्रुवता है। उत्पाद-व्यय और ध्रुवता तो सदा ही साथ-साथ रहते हैं। यही सत् का लक्षण है–उत्पादव्ययधौव्ययुक्तं सत्। हो यह रहा है कि वेदान्ती सत् का लक्षण पहले निर्धारित कर लेता है कि सत् वह है जो सर्वथा ध्रुव हो और फिर जगत् को मिथ्या घोषित कर देता है।

सत्य की तरतमता

4. डॉक्टर डी. एस. कोठारी सत्य और मिथ्या की सापेक्षतापरक एक दूसरी व्याख्या करते हैं। जब तक जल, जल रूप में है तब तक जल सत्य है। किन्तु जैसे ही जल ऑक्सिजन और हाईड्रोजन में बदल जाता है, वह मिथ्या हो जाता है और ऑक्सिजन तथा हाईड्रोजन सत्य हो जाते हैं। किन्तु जैसे ही ऑक्सिजन तथा हाइड्रोजन क्वान्टम अर्थात् ऊर्जा

में बदलते हैं वैसे ही क्वान्टम सत्य हो जाता है तथा ऑक्सिजन और हाइड्रोजन मिथ्या हो जाते हैं। इस प्रकार हम एक सत्य से दूसरे सत्य की ओर चलते हैं, न कि असत्य से सत्य की ओर। पण्डित मधुसूदन ओझा इसे दूसरी दृष्टि से इस प्रकार कहते हैं कि मिथ्या में सत्य और असत्य का मिथुनी-भाव रहता है। मिथ्या अलीक का नाम नहीं है अपितु सत्यासत्य के मिथुनीभाव का नाम है। आचार्य शंकर भी **'सत्यानृते मिथुनीकृत्य जगत्प्रवर्तते'** कहकर जगत् के मिथ्यात्व की ऐसी ही व्याख्या कर रहे प्रतीत होते हैं।

सत् का लक्षण

वेदान्ती के विपरीत जैन जगत् को सत्य पहले मान लेता है और क्योंकि जगत् उत्पाद-व्यय-ध्रुवात्मक है अतः वह सत् का लक्षण भी उत्पाद-व्यय-ध्रुवात्मकता कर देता है। अभिप्राय यह हुआ कि सत् के लक्षण में मतभेद होने के कारण यह मतभेद हो जाता है कि जगत् सत् है या नहीं। जिन दर्शनों ने भी जगत् को सत्य माना उन्हें एक-न-एक रूप में अनेकान्त को मानना ही पड़ा क्योंकि जगत् है ही त्रयात्मक। ऐसे दर्शनों में सभी वस्तुवादी दर्शन शामिल हैं, यथा पूर्वमीमांसा, सांख्य, योग, न्याय, वैशेषिक तथा चार्वाक। जिन्होंने जगत को वास्तविक नहीं माना उनके लिए जगत् का त्रयात्मक होना कोई विशेष महत्त्व नहीं रखता क्योंकि उनकी दृष्टि में जगत् वास्तविक है ही नहीं। फिर भी जो प्रतीति में आ रहा है उसका सर्वथा अपलाप नहीं किया जा सकता। अतः प्रत्ययवादियों ने भी व्यवहार में तो अनेकान्त को स्थान दे ही दिया।

वेदान्त का अनेकान्त

5. अद्वैतवादियों ने अद्वैत की भी एक सीमा बाँधी—भावाद्वैतं सदा कुर्यात् क्रियाद्वैतं न कर्हिचित्। क्रिया में अद्वैत नहीं है। द्वैतवादियों ने अद्वैतवाद पर जितने आरोप लगाये वे ये मानकर लगाये कि अद्वैतवादी व्यवहार में भी अद्वैत का अनुमोदन करे। (तुलनीय आतमीमांसा, 4, पुण्यपापक्रिया न स्यात् प्रेत्यभावः फले कुतः। बन्धमोक्षौ तेषां न येषां नासि नायकः) वस्तुस्थिति यह है कि आचार के क्षेत्र में जिस प्रकार जैन

अहिंसा, संयम, और तप की बात करता है, अद्वैतवादी भी द्वैतवाद का पालन करता है, दूसरे शब्दों में वह भी व्यवहार की अपेक्षा से अनेकान्ती ही है। रहा प्रश्न परमार्थ का सो अद्वैतवादी के लिए श्रुति का 'एकत्वमनुपश्यत' वचन प्रमाण है, वहाँ परमार्थ में यह एकान्त का ही समर्थन करता है। इस प्रकार वेदान्ती के अनेकान्त का अनेकान्त यह बनेगा कि व्यवहार की अपेक्षा अनेकान्त है, परमार्थ की अपेक्षा अनेकान्त नहीं है। 'अनेकान्त' को अनेकान्तवाद न बनायें तो उपर्युक्त वक्तव्य सापेक्ष होने के कारण अनेकान्त की सीमा में जा सकते हैं। किन्तु अनेकान्तवादी जैन को अनेकान्त में ऐसी सापेक्षता स्वीकार नहीं है। ठीक भी है; यदि जैन भी ऐसा अनेकान्त स्वीकार कर लेगा तो उसका स्वतन्त्र अस्तित्व ही नहीं होगा।

समयसारकलश

6. ऐसा नहीं है कि जैन मनीषिों ने वेदान्ती की इस स्थिति को न समझा हो। समयसारकलश का एक श्लोक है–

उदयति न नयश्रीरस्तमेति प्रमाणं
क्वचिदपि च न विद्मो याति निक्षेपचक्रम्।
किमधिकमभिदध्मो धाम्नि सर्वंकषेऽस्मिन्
अनुभवमुपयाते भाति न द्वैतमेव॥

कठिनायी यह हुई कि जैसे ही जैन मनीषी ने अद्वैत की स्थिति समझनी चाही, उसे भी द्वैत का भान ही होना बन्द हो गया–भाति न द्वैतमेव।

प्रमाणातीत

7. अस्तमेति प्रमाणम्– जब प्रमाण अस्त होता है तो दो सम्भावनायें रहती हैं-या तो हम अप्रामाणिक हो जाते हैं या प्रमाणातीत हो जाते हैं **Supra Logical** हो जाते हैं। आगम प्रमाण अनुमान-प्रमाण के आधीन नहीं है कि आगम की हर बात अनुमान या तर्क द्वारा सिद्ध की जाये। आगम एक स्वतन्त्र प्रमाण है जिसका आधार पारमार्थिक

प्रत्यक्ष है जिसे वैदिक परम्परा 'साक्षात्कार' शब्द से कहती है। पारमार्थिक प्रत्यक्ष इन्द्रियातीत है, जबकि अनुमान का आधार इन्द्रियों द्वारा किये जाने वाले 'भूयोदर्शन' के बल पर प्राप्त व्याप्ति का ज्ञान ह। दोनों का भिन्न क्षेत्र है। प्रमाण व्यवस्था यह होगी कि परमार्थिक प्रत्यक्ष द्वारा प्राप्त ज्ञान को बतलाने वाला आगम सदा निर्दोष रहेगा, जबकि इन्द्रियजन्य ज्ञान पर टिकने वाला अनुमान सदा हेत्वाभास की शंका से ग्रस्त रहता है। अतः अनुमान या तर्क के आधार पर आगम की साधुता-असाधुता का निर्णय नहीं हो सकता।

आगम प्रमाण

8. आगम तो श्रद्धा का ही विषय रहेगा। अतः तत्त्वार्थसूत्र में ज्ञान से भी पहले श्रद्धा को रखा है—**सम्यग्दर्शन-ज्ञान चारित्राणि मोक्षमार्ग।** हम तर्क से यह सिद्ध नहीं कर सकते कि अग्नि उष्ण है। यह तो अनुभवगोचर ही है। अतः आचारांगसूत्र ने कहा-**तक्का तत्थ न विज्जइ, मई तत्थ न गाहिया, सव्वे सरा निवट्ठन्ति।** उपनिषदों ने कहा-नैषा मतिस्तर्केणापनेया। निष्कर्ष यह हुआ कि जैन मनीषियों ने सभी भावों को सापेक्ष माना—**एको भावः सर्वथा येन ज्ञातः सर्वे भावाः सर्वथा तेन ज्ञाताः सर्वे भावाः सर्वथा येन ज्ञाताः एको भावः सर्वथा तेन ज्ञातः** इसका आधार केवलियों की वाणी है। **जे एगं जाणइ से सव्वं जाणइ से एगं जाणइ।** इस वाणी पर जिसकी श्रद्धा है वह सभी सत्यों को सापेक्ष मानता है और अनेकान्त का यही अर्थ समझता है कि सभी सत्य का आधार अनुभव है और क्योंकि अनुभव में सर्वत्र सापेक्षता आती है अतः निरपेक्ष सत्य कुछ भी नहीं है। इस विषय में यह आपत्ति आयी कि फिर तो सापेक्षता सर्वतोग्राही होने से स्वयं ही निरपेक्ष हो गयी। आचार्य महाप्रज्ञ ने इसका यह उत्तर दिया कि पंचास्तिकायों का अस्तित्व निरपेक्ष है। अतः अनेकान्त भी अनेकान्तात्मक होगा न कि एकान्तात्मक। इसके विपरीत वेदान्ती के लिए नेह नानास्ति किंचन' की श्रुति प्रमाण है। अतः वह अनेकता को नहीं मानता प्रत्युत दृश्यमान अनेकता को द्वितीय श्रेणी का अर्थात् व्यावहारिक सत्य मानता है और वहाँ अनेकान्त की सत्ता को स्वीकार भी करता है। हमारा निष्कर्ष यह है कि जैन और

वेदान्ती के मतभेद का कारण श्रद्धा है, आगम पर विश्वास है। उसमें साधुता असाधुता का निर्णय तर्क के आधार पर नहीं किया जा सकता। इस निष्कर्ष की पुष्टि में हम दिगम्बर-श्वेताम्बर के पारस्परिक मतभेद का प्रश्न लें। दिगम्बर और श्वेताम्बर दोनों ही अनेकान्तवादी है। फिर ये दोनों अपना मतभेद अनेकान्तवाद की सापेक्षता के आधार पर मिटा क्यों नहीं लेते। उत्तर यह है कि इन दोनों के आगम उनकी श्रद्धा का विषय है। दोनों अपनी-अपनी श्रद्धा के अनुकूल अचेलकत्व-सचेलकत्व के पक्ष में तर्क खोज लेंगे किन्तु किसका तर्क ठीक है—यह निर्णय कभी नहीं हो सकेगा क्योंकि यह मतभेद तर्क पर नहीं, श्रद्धा पर टिका है। दोनों को अपने-अपने तर्क ठीक नजर आते हैं क्योंकि तर्क तो एक निमित्त है, असली कारण श्रद्धा है। मतभेद तर्क के कारण नहीं, श्रद्धा के कारण है।

तर्क की पकड़ से परे

9. सन् 2010 में एक परीक्षण हुआ। बेरेलियम नाम की धातु के एक कण के बारे में यह पाया गया कि वह कण युगपद् ऊपर-नीचे अथवा दाँये-बाँये गति कर सकता है। एक ही कण एक ही समय में एक साथ दो विपरीत दिशाओं में गति करे-यह स्थिति तर्क की पकड़ से परे की है। जब यह स्थिति मैंने कुछ चिन्तकों के सामने रखी तो उन्होंने कुल मिलाकर यही कहा कि ऐसा नहीं हो सकता; वैज्ञानिकों को धोखा हुआ है। किन्तु वैज्ञानिकों का स्पष्ट और दृढ़ मत है कि ऐसा ही है। यह अटपटी (Bizzare) स्थिति वास्तविक है, दृष्टि का भ्रम नहीं है। यह स्थिति जैन आचार्यों के भी सामने नहीं आयी थी। अब तक हम प्रकृति से परे को ही अचिन्त्य मान रहे थे—

अचिन्त्याः खलु ये भावा न ताँस्तर्केण योजयेत्।
प्रकृतिभ्यः परं यच्च तदचिन्त्यस्य लक्षणम्॥

अब स्थिति यह कि प्रकृति भी अचिन्त्य हो गयी है। यह अनेकान्तवाद भले न हो, अनेकान्त तो है ही कि एक कण में युगपद्

दो परस्पर विरुद्ध गतियाँ देखने में आ रही हैं। यह अनेकान्त का एक नया ही आयाम सामने आया है जिस पर न जैन, न वेदान्ती और न ही बौद्ध चिन्तकों ने विचार किया है।

10. वेद के नासदीय सूक्त के सामने अवश्य कुछ ऐसा रहा होगा जिसके लिए ऋषि को कहना पड़ा कि पता नहीं परमात्मा को भी सृष्टि की उत्पत्ति का रहस्य विदित है या नहीं है–

योऽस्या अध्यक्षः परमे वयोमन्
सो अंग वेद यदि वा न वेद

11. हमने अन्यत्र जैनेतर भारतीय दर्शनों में अनेकान्त के बीज खोजे हैं। वस्तुवादियों में सबने अनेकान्त को स्वीकार किया है किन्तु भेद और अभेद के बीच वैशेषिक दोनों को मानकर भी भेद को मुख्य मानता है, जबकि सांख्य दोनों में अभेद को मुख्य मानता है। जैन भेद-अभेद दोनों को समान महत्त्व देता है। डॉ वाई.जे. पद्मरज्जैया ने अपने ग्रन्थ Jaina Thoeries of Reality and knowledge में इस विषय पर विस्तार से प्रामाणिक रूप में विचार किया है। हमारा निष्कर्ष यह है कि जैन सम्मत अनेकान्त तो एक वाद के रूप में हमारे सामने है जो केवल जैनदर्शन तक ही सीमित है किन्तु वाद-मुक्त अनेकान्त बहुत व्यापक है। वैदिक परम्परा में भी **'असच्च सच्च परमे व्योमन्'** (ऋग्वेद 10.5.7) **'उभयं वा एतत्प्रजापतिर्निरुक्तञ्चानिरुक्तं च'। 'निरुक्तं परिमितम्- निरुक्तमपरिमितम्** (शतपथब्राह्मण 6.5.3.7) तथा **'तस्यह प्रजा-पतेरर्धमेव मर्त्यमासीदर्धममृतम्** (शतपथब्राह्मण 10.1.3. 2) आदि वाक्य स्पष्टतः अनेकान्त का प्रतिपादन कर रहे हैं। दार्शनिक युग में पूर्वमीमांसकों ने अनेकान्त का न केवल प्रतिपादन किया प्रत्युत नामतः भी अनेकान्त का स्मरण किया। मीमांसाश्लोकवार्तिक (वनवाद, 21.22.23) निम्न श्लोक देखें–

वर्धमानकभंगे च रुचकः क्रियते यदा।
तदा पूर्वार्थिनः शोकः प्रीतिश्चाप्युत्तरार्थिनः।

हेमार्थिनस्तु माध्यस्थ्यं तस्माद्वस्तु त्रयात्मकम्।

तुलनीय है शास्त्रवार्तासमुच्चय (7.478)

घटमौलिसुवर्णार्थी नाशोत्पादस्थितिष्वयम्।
शोकप्रमोदमाध्यस्थ्यं जनो याति सहेतुकम्॥

इतना ही नहीं, अनेकान्त संशयवाद है–इसका भी निराकरण पूर्वमीमांसा ने सबल शब्दों में किया–

वस्त्वनेकत्ववादाच्च सन्दिग्धाप्रमाणता।
ज्ञानं सन्दिह्यते यत्र तत्र न स्यात् प्रमाणता।
इहानेकान्तिकं वस्तु इत्येवं ज्ञानं सुनिश्चितम्।

(मीमांसाश्लोकवार्तिक, वनवाद 75-78)

वेदभाष्यकार सायणाचार्य ने यह प्रश्न अपनी भाष्यभूमिका में बहुत विस्तार से उठाया है कि वेद में परस्पर विरुद्ध अर्थ के प्रतिपादक वाक्यों में सामञ्जस्य स्थापित करना भाष्यकार का दायित्व है। कहीं **'एक एव रुद्रः'** (तैत्तिरीय संहिता 1.8.61) कह दिया गया है तो कहीं **'असंख्याता सहस्राणि ये रुद्रा अधिभूम्याम्'** (यजुर्वेद वाजसनेयी संहिता, 16.54) कहा गया है। यह प्रश्न यास्काचार्य ने निरुक्त में भी उठाया और जैमिनी ने भी उठाया। संक्षेप में हम महर्षि अरविन्द के शब्दों में कह सकते हैं **'जीवन की सभी समस्याएं तत्त्वतः सामञ्जस्य की समस्याएं हैं'** (दिव्य जीवन, पृ. 4) जैन आचार्यो ने इस सामञ्जस्य को स्थापित करने का प्रयत्न अनेकान्तवाद के माध्यम से किया किन्तु यह प्रयत्न अन्य दर्शनों में भी अनेकान्त के माध्यम से किया गया। यही अनेकान्त की व्यापकता है। इस लेख में हमने अपने को भारतीय दर्शनों तक सीमित रखा है किन्तु यदि अन्य दर्शनों में भी देखें तो अनेकान्त के बीज मिलेंगे।

जैनेतर ग्रन्थों में अनेकान्त के समर्थन हेतु तुलनीय हैं निम्न ग्रन्थः–

1. महाभाष्य, पस्पशाह्निक पृ. 84-85
2. योगसूत्र, व्यासभाष्य पृ. 13
3. वात्स्यायन, न्यायसूत्र 1.1.41
4. शांकरभाष्य, तैत्तिरीयोपनिषद् 2.6.3
5. शास्त्रदीपिका, पृ. 101

जम्हा ण णएण विणा, होइ णरस्स सियवायपडिवत्ती।
तम्हा सो बोहव्वो, एयंतं हंतुकामेण।।
—समणसुत्तं, गाथा 691

नय के बिना मनुष्य को स्याद्वाद का बोध नहीं होता। अतः जो एकान्त का या एकान्त आग्रह का परिहार करना चाहता है, उसे नय को अवश्य जानना चाहिए।

अनेकान्तवाद का स्वरूप और उसके तार्किक आधार

–प्रो. धर्मचन्द जैन*

भारतीय दर्शन में सत् एवं वस्तु पर्यायार्थक हैं। सभी दर्शन सत् का अपनी-अपनी दृष्टि से विवेचन करते हैं। स्वरूपतः सत् तो जैसा है, वैसा है। हमारे जानने की दृष्टि एवं कहने की प्रक्रिया में ही भेद है, इसलिए उस सत् या वस्तु की व्याख्या विभिन्न दर्शन भिन्न-भिन्न रीति से करते हैं। यह तथ्य वेद में ''एकं सत् विप्राः बहुधा वदन्ति'' वाक्य से अभिव्यक्त हुआ है। अब किस दृष्टि को सम्यक् कहें एवं किसे मिथ्या? यह कठिन प्रश्न खड़ा होता है। अतः सभी दर्शन अपनी दृष्टि से किए गए विवेचन को सम्यक् एवं दूसरे दर्शन के विवेचन को दोषपूर्ण ठहराते हैं। वे यदि अनेकान्त की व्यापकदृष्टि को स्वीकार करें तो अन्य दर्शनों की विवेचना में भी किसी नय से सत्यता जानी जा सकती है। यह कार्य जैन दार्शनिकों ने किया है। वे किसी नय से अन्य दर्शनों में भी सत्यता की अन्वेषणा करते हैं तथा समग्रदृष्टि से जब विचार करते हैं तो उसमें रही हुई एकान्तदृष्टि में कमियों को भी उजागर करते हैं।

जैनदर्शन वस्तु को अनेकधर्मात्मक एवं अनन्तधर्मात्मक स्वीकार करता है। उत्पादव्ययध्रौव्यात्मक की दृष्टि से वह उसे त्रयात्मक भी मानता है। वस्तु को द्रव्यपर्यायात्मक स्वीकार करने के कारण वह उसमें नित्य-अनित्य, सामान्य-विशेष, अभिलाप्य-अनभिलाप्य, भाव-अभाव आदि विरोधी धर्मों को भी अंगीकार करता है। विरोधी धर्मों के समन्वय के लिए जैन दार्शनिकों के पास द्रव्यार्थिक एवं पर्यायार्थिक नयों की

---

* संस्कृत विभाग, जयनारायण व्यास विश्वविद्यालय, जोधपुर (राज.)

दृष्टि है, जिससे दार्शनिक स्तर पर समाधान प्राप्त होता है। तथा व्यवहार जगत् में भी कोई बाधा उत्पन्न नहीं होती है। सत् को मात्र नित्य मानने वाले वेदान्तदर्शन तथा सत् को मात्र क्षणिक मानने वाले बौद्धदर्शन को संव्यवहार सत्य की विवेचना अलग से करनी पड़ती है, किन्तु अनेकान्तवाद में वस्तु को द्रव्यार्थिकनय की दृष्टि से नित्य एवं पर्यायार्थिक नय की दृष्टि से अनित्य मानने वाले जैन दर्शन को व्यावहारिक जगत् में कोई बाधा नहीं आती है। अनेकान्तवाद व्यवहार एवं परमार्थ दोनों की व्याख्या कर देता है। वह वस्तु की नित्यता एवं अनित्यता दोनों को भिन्न-भिन्न दृष्टियों से विवेचित करता है।

वस्तु की अनेकधर्मात्मकता

वस्तु अनेकधर्मात्मक है- यह जैन दर्शन की मान्यता के रूप में प्रसिद्ध है, किन्तु अवलोकन करने पर ज्ञात होता है कि इसका अस्तित्व भारतीय दर्शन के विभिन्न सम्प्रदायों में उपलब्ध है।

